॥ श्रीरस्तु ॥

॥ श्रीमते रामानुजाय नमः । श्रीमल्लोकगुरवे नमः । श्रीमद्वरवरमुनये नमः ॥

[...]ोकगुरुनिर्मितस्य आर्यभोग्यस्य श्रीवचनभूषणदिव्यशास्त्रस्य वज्रकवचायमानम्

॥ श्रीवचनभूषणमीमांसाभाष्यम् ॥

[...]कुन्नत्तूरय्यन समाख्यानां श्रीमदनन्तार्यवर्यगुरुचरणानामनवग्रहानुग्रहफलभूतम्

[...] प्रतिवादि भयङ्कर अण्णङ्गराचार्येण परिशोध्य, ग्वालियर राज्यान्तर्गत मन्दसोर [...]रमभागवत वेंकटलाल पसारी नामकस्य श्रीवैष्णवदासस्य द्रव्यसाहाय्येन प्रोत्साहनेन च

Srivacanabhushana Mimamsa-Bhashyam.
Ed. P. B. Annangaracharya

देवकोट्टै - राजाजी मुद्रणालये सम्मुद्र्य प्रकाशितम् ।

१९४९

मूल्यम् ३—०—०

प्राप्तिस्थानम् ग्रन्थमाला आफीस् कांचीपुरम् ॥
P. B. Annangaracharya, Granthamala Office, Kancheepuram.

Sri.

Jaya Vijayeebhava Lokacharya.

Jaya Vijayeebhava Sri Varavaramuneendra.



Srivachanabhooshana-meemamsabhashya.

OF

(SRI KUNNATHOOR AYYAN SWAMI.)

Edited by

P. B. Annangaracharya,

KANCHEEPURAM.

GRANTHAMALA OFFICE

1949

Price Rs. 3

श्रीः ॥

श्रीमते रामानुजायनमः ।

श्रीमल्लोकगुरवे नमः । श्रीमद्वरवरमुनये नमः ॥

श्रीकुन्नत्तूरय्यन् समाख्यैः श्रीमदनन्तार्यवर्यैर्गुरुचरणैरनुगृहीतम्

* श्रीवचनभूषणमीमांसाभाष्यम् ॥ *

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् । यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे । संसारभोगिसंदष्टजीवजीवातवे नमः ॥

साङ्गाखिलद्रविडसंस्कृतरूपवेदसारार्थसंग्रहमहारसवाक्यजातम् ॥

सर्वज्ञलोकगुरुनिर्मितमार्यभोग्यं वन्दे सदा वचनभूषणदिव्यशास्त्रम् ॥

सर्वप्रकारैराचार्यसंप्रीत्यैकप्रयोजनम् । अनन्तार्यान्वयोत्तंसमाश्रयेऽनन्तदेशिकम् ॥

विषयनिरूपणाधिकारः प्रथमः

[मूलम् . सू. १. वेदार्थमरुदियिडुवदु स्मृतीतिहासपुराणङ्गळाले.]

इदं शास्त्रं प्रपत्तिपरिच्छेदवृत्तिपरिच्छेदात्मना परिच्छेदद्वयात्मकम् । पूर्वस्मिन्परिच्छेदे द्वयस्य पूर्ववाक्यार्थो विचार्यते । उत्तरे उत्तरवाक्यार्थः ॥

अत्र (वेदार्थम्) इत्यारभ्य (मुर्पट्टदु) [वा – ४] इत्यन्तं, शास्त्रस्यारम्भणीयत्वसमर्थनात् शास्त्रोपोद्घातः । (इतिहास) [वा– ५] इत्यारभ्य (अळकाले तिरुत्तुम्) [वा– १३] इत्यन्तेन * श्रीशब्दार्थो निरूप्यते । (अरियाद) [वा– १४] इत्यारभ्य (इवळुक्काक) [वा– २२] इत्यन्तेन द्वितीयप्रकरणेन * नारायण * चरण * शरणशब्दानामर्थः ॥ (प्रपत्तिक्कु) [वा– २३] इत्यारभ्य (तिरुक्कुळलोशैयिलुम् काणलाम्) [वा– ५६] इत्यन्तेन * तृतीयप्रकरणेन मतुप्प्रत्ययोत्तमपुरुषयोरर्थः । (इदुतन्नै) [वा– ५४] इत्यारभ्य * (एकान्ती व्यपदेष्टव्यः) [वा– ७९] इत्यन्तेन चतुर्थप्रकरणेन * प्रपद्ये इति क्रियापदार्थो निरूप्यते ॥

तत्र, उपोद्घाते प्रथमाधिकरणे, विषयप्रयोजनाद्यभावाच्छास्त्रस्यानारम्भणीयत्वमाशङ्क्य तत्समर्थनं क्रियते ॥ अत्रैवं संशयः ; इदं शास्त्रमनारम्भणीयम्, उतारम्भणीयमिति; तदर्थं अस्य विषयादिर्न संभवति, उत संभवति वेति; तदर्थम्, * मुमुक्षुर्वै शरणमहं प्रपद्ये * अमृतस्यैष सेतुः * यमेवैष वृणुते तेन लभ्यः * न्यास इति ब्रह्मा *

इत्यादिवाक्यविशेषाणां एतत्संग्रहरहस्यत्रयस्य च वेदान्तशास्त्र एवान्तर्भावः, उत तद्भिन्नशास्त्रत्वमिति; तदर्थम्, * असारम् * इत्यादिवचनं तद्भिन्नत्वे प्रमाणं न भवति, उत भवतीति ॥ यदा न भवति, तदा उदाहृतवाक्यानां वेदान्तशास्त्रभिन्नशास्त्रत्वे प्रमाणाभावात् भिन्नशास्त्रत्वासिद्ध्या विषयाद्यभावात्, निर्विषयं शास्त्रमनारम्भणीयमिति पूर्वपक्षे फलफलिभावः ॥

यदा, असारम् इत्यादिवचनम् उदाहृतवेदान्तवाक्यविशेषाणां वेदान्तशास्त्रात् भिन्नशास्त्रत्वे प्रमाणं भवति, तदा तेषां शास्त्रान्तरत्वाद्विषयादिसंभवेन प्रकृतं शास्त्रमारम्भणीयमिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु, न तावदिदं शास्त्रमारम्भणीयम्, वेदान्तं शास्त्रत्वाभावात्; न चेदं भक्तिशास्त्रम् । ब्रह्मसूत्रस्य तथात्वेन कृतकरत्वप्रसंगात् । नापि प्रपत्तिशास्त्रम्; * नानाशब्दादिभेदात् * इत्यादिभिः प्रपत्तेरपि चिन्तितत्वेन तस्यैव प्रपत्तिशास्त्रत्वात् । तत्राचिन्तितानां तदुपयुक्तानां च भगवच्छास्त्रादिषु प्रपत्त्यध्यायेषूपबृंहितत्वात् । नापि तदुभयातिरिक्तं शास्त्रम्; भक्तिप्रपत्तिव्यतिरेकेण अतिरिक्तमोक्षसाधनाभावात्; तत्साध्यमोक्षविशेषासिद्धेश्च ॥

न च आचार्यहृदयादिषु वेदान्तशास्त्रात्सारस्य शास्त्रान्तरत्वेन प्रतिपादनात्तत्सिद्धिः । भक्तिशास्त्रापेक्षया प्रपत्तिशास्त्रस्यैव सारतया तत्र प्रतिपादितत्वात् ॥ न च * शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम् । उपदेशाद्धरिं बुद्ध्वा विरमेत्सर्वकर्मसु * ॥ इत्यत्र उपदेशशास्त्रं भिन्नमुक्तमिति वाच्यम् । न ह्यत्र शास्त्रोपदेशयोः भिन्नं विषयादि प्रतीयते; किंतु, तदभेद एव । शास्त्रे क्लेशेन साध्यं यज्ज्ञानं तदत्र अक्लेशेन भवतीति प्रतिपादनात् । * अनन्तपारं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः । यत्सारभूतं तदुपाददीत हंसो यथा क्षीरमिवाम्बुमिश्रम् * इत्येतदप्युक्तार्थाभिप्रायमेव ॥

ननु, * असारमल्पसारं च सारं सारतरं त्यजेत् । भजेत्सारतमं शास्त्रे रत्नाकर इवामृतम् ॥ * इति वैकुण्ठदीक्षितीयोपात्तं वचनमस्तीति चेत्; ततः किम्? अत्र असारशब्देन — वेदबाह्यकुदृष्टिशास्त्रमुच्यते; अल्पसारमित्यनेन — पूर्वभागे ऐहिकफलतत्साधनप्रतिपादकांश उच्यते; सारशब्देन — आमुष्मिकफलतत्साधनप्रतिपादकांशः; सारतरशब्देन — आत्मप्राप्तितत्साधनप्रतिपादकांशः; सारतमशब्देन — परमात्मप्राप्तितत्साधनभक्तिप्रपत्तिप्रतिपादकांशश्च उच्यते ॥

किंच, * वेदाच्छास्त्रं परं नास्ति * न वेदान्ताच्छास्त्रम् * इत्यादिना अतिरिक्तशास्त्रान्तरं निषिध्यते; तस्मात् उदाहृतवेदान्तवाक्यानां रहस्यत्रयस्य च वेदान्तशास्त्रादुत्तीर्णशास्त्रत्वे मानाभावात् अस्य विषयप्रयोजनाद्यभावेन अनारम्भणीयत्वमिति ॥

अत्रोच्यते (वेदार्थमिति) अत्र, व्युत्पादनीयास्सर्वेऽप्यर्थाः वेदान्तसारवाक्यसिद्धा इति इदं शास्त्रं वेदशास्त्रमित्यर्थः । वेदान्तसारवाक्यार्थः स्मृतीतिहासपुराणैः निर्णीयते इत्यर्थः । वेदान्तसारेति वक्तव्ये वेदेति सामान्योक्तिः वेदमात्रस्यैकशास्त्रत्वमङ्गीकृत्य । पूर्वभागावसेयकर्मस्वरूपस्य परार्थकैङ्कर्यत्वम्; उपरिभागवेद्यब्रह्मणो निर्हेतुकोपायत्वम्, तत्रोक्तभक्तेः प्राप्यरुचित्वम्, तदुक्तप्रपत्तेः स्वरूपयाथात्म्यज्ञानरूपत्वं, तदुभयसाध्यानुभवकैङ्कर्ययोः केवलपरार्थत्वञ्च अस्मिन् शास्त्रे प्रतिपाद्यत इति सूचनार्था । ततश्चैवमर्थपञ्चकयाथात्म्यप्रतिपादनात् सारं शास्त्रम् । सिद्धोपायफलभूतशरणागतिप्रतिपादनात् षडङ्गप्रपत्तेरुत्तरवृत्तितया फलत्वप्रतिपादनाच्च फलप्रपत्तिशास्त्रमित्युच्यते ॥

ननु, एतत्सर्वं तदा शोभते; यदा उदाहृतवाक्यानां तत्संग्रहरहस्यत्रयस्य चोक्तार्थपरत्वेन भिन्नशास्त्रपरत्वे प्रमाणमस्ति; तदेव नास्तीत्युक्तमिति चेत् न, * असारम् * इत्यादेः प्रमाणत्वात् ॥ अत्र तावत् असारशब्दस्य— बाह्यकुदृष्टिशास्त्रपरत्वं नोपपद्यते; असारं शास्त्रं त्यजेदिति हि योजना । तत्र बाह्यकुदृष्टिशास्त्रस्य शास्त्रत्वमेव नास्ति, अलौकिकफलतत्साधनाधिकाराद्यनुबन्धप्रतिपादकं हि शास्त्रम्; शासनाच्छास्त्रमित्युक्तेः । शासनं च विधिः । न हि बाह्यकुदृष्टिशास्त्रेषु साक्षाद्वा शीक्षादिवत् परम्परया वा [वेदोदित] पुरुषार्थसंबन्धोऽस्ति । * या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि तास्स्मृताः * इत्युक्तेः ॥

न च सांख्ययोगादिष्वविरुद्धांशस्य परम्परया वेदोदितपुरुषार्थसंबन्धित्वाच्छास्त्रत्वोपपत्तिरिति वाच्यम् । तथाविधानां तेषां वेदान्तशास्त्र एवान्तर्गततया सारतमशब्दार्थत्वेन भजनविषयत्वात् । किंच, बाह्यकुदृष्टिशास्त्रस्य शास्त्रत्वम्, * वेदाच्छास्त्रं परं नास्ति * इत्यादिना निषिद्धम् । न चात्र परशब्दः – उत्कर्षवाची; तथात्वे समाभ्यनुज्ञानापत्तेः । अतोऽत्र परशब्दः अन्यवाची । अपि च, अत्र रत्नाकरस्य दृष्टान्तितत्वात् दार्ष्टान्तिकेऽपि त्याज्योपादेयविभागविषयस्य एकावयवित्वमवगम्यते । न च बाह्यादिशास्त्रस्य शीक्षादिवद्वेदशास्त्रांशत्वम् । अतोऽत्र वेदशास्त्र एव दार्ष्टान्तिकत्वेन विवक्षिते त्याज्योपादेयविभागः क्रियत इति वक्तव्यम् । तस्मादसारशब्दो न बाह्यकुदृष्टिशास्त्रपरः । एवमल्पसारसारशब्दयोरप्यैहिकामुष्मिकफलतत्साधनप्रतिपादकांशपरत्वं दुरुपपादम् । * एते वै निरयास्तात * स्वर्गेऽपि पातभीतस्य * इत्यादिभिः विषयानुभवस्यासारत्वोक्तेः । यदि भ्रान्तिसिद्धसुखविवक्षया सारशब्दः तदा प्रकरणस्थसारशब्दानामर्थवैरूप्यम् । अभ्रान्तिसिद्धसुखमेव ह्यत्र सारशब्दवाच्यम् । तच्चात्मानन्द एव । * रसो वै सः * इति श्रुतेः । अन्यथा, सारशब्दस्य नानार्थत्वापत्तिः । सारतरशब्दस्य इक्षुरकप्रायातिक्षुद्रात्मप्राप्तिपरत्वमप्यनुपपन्नम् । तस्मात् अत्रासारशब्देन ऐहिकामुष्मिकैश्वर्यप्रतिपादकांशः; अल्पसारशब्देन आत्मप्राप्तितत्साधनप्रतिपादकांशः; सारशब्देन परमात्मप्राप्ति-तत्प्रापकभक्तिप्रतिपादकांशः; सारतरशब्देन अनुभवपरीवाहरूपस्वार्थकैङ्कर्य-तत्साधनात्मसमर्पणप्रतिपादकांशः, सारतमशब्देन परार्थकैङ्कर्य-तत्साधनसिद्धोपायप्रतिपादकांशश्चोच्यते । उक्तार्थपरत्वे पदानां स्वारस्यातिशयो द्रष्टव्यः । न च, * वेदसारोपनिषत् * इत्यादिना आचार्यहृदयवाक्येन विरोधः, तस्य शब्दप्राधान्यविवक्षया कृतत्वेन तदभावात् ॥

किंच, अत्र शास्त्रचतुष्टयत्यागपूर्वकस्सारतमशास्त्रस्वीकारो हि विधीयते । तत्र त्यागस्यानुवाद्यत्वं न संभवति । कैवल्यशास्त्रस्योपादेयवेदान्तशास्त्रगतत्वेन तत्त्यागस्याप्राप्तत्वात् । विधेयत्वं च न संभवति; बाह्यकुदृष्टिशास्त्राणामनवसरग्रस्तत्वेनाप्राप्तत्वात् । कर्मकाण्डस्य अल्पास्थिरफलत्वनिर्णयेन तत्त्यागस्य स्वतः प्राप्तत्वाच्च । भजेदिति विधिश्चाज्ञातज्ञापनम्, उत अप्रवृत्तप्रवर्तनम्? आद्ये * अधीतवेदः पुरुषस्स्वयमेव प्रवर्तते * श्रोतव्य इति चानुवादः * इति भाष्यविरोधः । न द्वितीयः, प्रथमसूत्रवत् अत्र श्लोके सिद्धे व्युत्पत्त्यादेरप्रतिपादनात् ॥

न च, अमुमुक्षुविषयोऽयं विधिः; तदा अधीतसाङ्गसशिरस्कवेदश्शक्तत्रैवर्णिको ह्यत्र नियोज्यः; तं प्रति कर्मविचारत्यागो न विधेयः; ब्रह्मविचार इव कर्मविचारेऽप्यस्याधिकारित्वात् । न चात्र त्यागोऽनुवाद्यः; अकृतकर्मविचारत्वेन निर्वेदाभावप्रसंगात् । तस्मात्कर्मणामल्पास्थिरफलत्वनिर्णयसहितानन्तस्थिरफलापातप्रतीतेर्वेदान्तशास्त्राधिकारत्वात् । अत्र तत्त्यागपूर्वकतत्स्वीकारो न विधीयते । किंतु, साङ्गाध्ययनेन तरतमभावापन्नानेक-

पुरुषार्थ - तत्साधनापातप्रतीतियुक्तं तत्र निरतिशयपुरुषार्थं परमसुकृतविशेषादपेक्षमाणं तत्त्यागपूर्वकतत् शक्तं त्रैवर्णिकमुद्दिश्य, परार्थकैङ्कर्यसिद्धोपायपरं निरतिशयपुरुषार्थप्रतिपादकं सारतमत्वादुपादेयम्; अन्यत्सर्वं सातिशयपुरुषार्थतत्साधनावबोधित्वात् त्याज्यमिति विधीयते ॥

अत्र, वेदान्तसारशास्त्रे कर्मशास्त्राधिगमस्यानधिकारत्वात्तत्त्यागविधिर्युक्तः । न च कर्मब्रह्मशास्त्रयोस्त्यागस्य विधेयत्वे तदुभयाप्रामाण्यापत्तिरिति वाच्यम्; निरतिशयपुरुषार्थ, शास्त्राकाङ्क्षारहितानां मन्दभाग्यानां सुकृततारतम्येन तत्र तत्राधिकृतत्वसंभवात् । तस्मादत्र कर्मशास्त्रत्यागपूर्वकं स्वीकार्यत्वेन विधेयं सारतमशास्त्रं वेदान्तशास्त्रं न भवति । किंतु वेदान्तसारशास्त्रं तद्भिन्नमिति सिद्धम् ॥

न चात्र सारतमशब्देनोपदेशशास्त्रं रहस्यत्रयमभिधीयते; तस्य कर्मविचारानधिकारत्वादिति वाच्यम् । उत्तरोत्तरं पुरुषार्थातिशयपरत्वप्रक्रमभङ्गप्रसंगात् । एवं शक्तत्रैवर्णिकं निरतिशयपुरुषार्थकाममुद्दिश्यानेन वचनेन वेदान्तशास्त्रविलक्षणं तत्सारशास्त्रं विहितम् । अस्यापि शास्त्रस्यासारादिशास्त्रमिश्रितत्वेन दुर्विवेचत्वात् एतदुपदेशरूपमेतत्समानार्थकं सुग्रहं रहस्यत्रयं ग्राह्यमिति कतिपयवचनैरुच्यते * अनन्तपारम् * शास्त्रज्ञानम् * इत्यादिभिः । ततश्च वेदान्तशास्त्रादतिशयितपुरुषार्थ – तत्साधनावबोधितत्सारशास्त्रसंग्रहरूपं रहस्यत्रयलक्षणमुपदेशशास्त्रं वेदान्तशास्त्राद्भिन्नमिति सिद्धम् ॥

किंच वाक्यगुरुपरम्परापूर्वकमिदं रहस्यत्रयं फलप्रपत्तिपरम्; न तु साधनप्रपत्तिसंग्रहपरत्वेन वेदान्तशास्त्रान्तर्गतम् । अत्रैवर्णिकोपदिष्टत्वात् ।

यद्यपि रथकारादेरग्न्याधानादाविव विशेषवचनात्तदधिकारस्संभवति । * नार्हन्त्याचार्यतां क्वचित् * इत्याचार्यत्वनिषेधेऽपि * न च हीनवयोजातिः प्रकृष्टानामनापदि * इति आपद्विषये आचार्यत्वं च संभवति । तथापि * मन्त्रं नियतमग्र्याणां यो हीनाय प्रयच्छति । स वै हीनगुरुर्निन्द्यस्तेन सार्धं पतत्यधः * ॥ इति प्रणवग्रहणतदुपदेशयोर्निषिद्धत्वेन अस्य साधनप्रपत्तित्वे प्रणवान्वितमन्त्रोपदेष्टृत्वानुपपत्तेः तदुपदिष्टमिदं फलप्रपत्तिपरं भवितुमर्हति; तत्परत्वे तु मुक्तानामिव स्वयम्प्रयोजनत्वेन सप्रणवे अधिकारस्संभवति । अत एवापशूद्राधिकरणे अध्यापनकर्मानुष्ठानानुगुणज्ञानाभावादनधिकार उच्यते । तेषां प्रबन्धे विशिष्टप्रणवमन्त्रानुच्चारणं तु लोकसंग्रहार्थम् । अन्यथा जन्मान्तरसंस्कारवशात् स्वाध्यायज्ञानवतां श्रीविदुरादीनां * धारणे शरीरभेदः * इति प्रत्यवायापत्तिः । श्रीभक्तिसारादिषु * कृष्णानां व्रीहीणां नखनिर्भिन्नम् * इति वेदधारणं प्रत्यक्षम् । एवं धारणेऽपि प्रत्यवायाभावे साधनानुष्ठानोपयोगिज्ञानद्वारा तद्धृतवेदस्य साधनत्वविरहः प्रयोजकः । अतस्सर्वत्र साधनत्वाकारस्यैव वर्णादिसापेक्षत्वात् फलरूपप्रणवोपदेष्टृत्वं पराङ्कुशादीनामुपपद्यते । अतः फलप्रपत्तिपरं, अत एव स्वयं फलरूपं रहस्यत्रयं सप्रणवं सर्वाधिकारमिति सिद्धम् । भगवदुपदिष्टरहस्यत्रयविवरणरूपाः दिव्यप्रबन्धा अस्य शास्त्रस्य विषयाः । तदुभयमीमांसारूपमिदं च फलप्रपत्तिशास्त्रम् । तस्माद्विषयप्रयोजनसत्त्वादारम्भणीयमिति ॥

ननु * श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः । तदिह विबुधगुप्तं मृत्युभीता विचिन्वन्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥ * इति वेदान्ताचार्योक्तिः कथमिव संगच्छत इति चेत्, यथा वीतरागाणां षट्कर्मण्यश्रद्धावारणाय ब्रह्मशास्त्रं कर्मशास्त्रशेषभूतं तदन्तर्गतं जैमिनिना वर्णितम्; तथा आत्म-

याथात्म्यज्ञानरहितानां साध्योपायशास्त्रे अश्रद्धा मा भूदिति सिद्धोपायशास्त्रमतिरिक्तमपि साधनभक्तिप्रपत्तिशास्त्रे अन्तर्भावितमिति तात्पर्यात् ॥ एवं यद्यपि * आ भगवत्तः प्रथिताम् * गुरुभ्यस्तद्गुरुभ्यश्च * इत्यनुसंहित-वाक्यगुरुपरम्परा मन्त्रस्य फलप्रपत्तिपरत्वे संगता, न षडङ्गप्रपत्तिपरत्वे । तथापि साधनप्रपत्तिशास्त्रस्यासंप्रदायत्वे, तन्निष्ठानां तत्राश्रद्धा स्यादिति वाक्यगुरुपरम्परा साधनप्रपत्तिशास्त्रेऽपि योजिता ।

अत्रायं संग्रहः :—

विषयस्सारभागोऽस्य वेदान्तात्पर इष्यते । परत्वं सारशास्त्रस्य 'असार' मिति मानतः ॥
तत्रासारपदं नैव बाह्यशास्त्रपरं भवेत् । अपूर्वार्थहिताज्ञादिबोधकं शास्त्रमीरितम् ॥
'शासनाच्छास्त्र' मित्युक्तेर्नैतद्बाह्यागमादिषु । 'या वेदबाह्या' इत्युक्तेः 'वेदाच्छास्त्र' मिति स्मृतेः ॥
किं चात्रार्णवदृष्टान्ताद्वेदे त्याज्यं हि गम्यते । सारात्पसारशब्दाभ्यामैश्वर्यं नाभिधीयते ॥
निरयत्वस्मृतेर्नो चेल्लक्षणासारशब्दयोः । अबाधितात्यल्पसुखं नापि सारतरं भवेत् ॥
तस्मादसारादिपदैरधिचिद्व्यवृत्तिषु । शास्त्राण्यधिकृतान्यत्र क्रमेणाभिहितानि हि ॥
सिद्धोपायपरं शास्त्रमुक्तं सारतमं त्विति । किंचात्र पूर्वकाण्डस्य त्यागपूर्वकसेवनम् ॥
वेदान्ते संगतं नैव तद्विचाराधिकारके । किंचोपदेशशास्त्रं च पराङ्कुशमुखोदितम् ॥
साधनत्वपरं नैव प्रपत्तेः प्रणवान्वितम् । तस्मादारभ्यतां शास्त्रमिदं सविषयादिकम् ॥ इति ॥

इति विषयनिरूपणाधिकारः ॥ १ ॥

॥ २ ॥ अथ मीमांसानिरूपणाधिकारः ॥

(अरुदियिडुवदु) करणसत्त्वेऽपि परिकराभावादनारम्भणीयमिति शङ्कया संगतिः । संशयस्तु, इदं शास्त्रमनारम्भणीयमुतारम्भणीयमिति । तदर्थं मीमांसालक्षणपरिकरसंपत्तिर्नास्ति – उतास्तीति । तदर्थमस्य प्रबन्धस्य अबाधितन्यायनिबन्धनात्मकत्वं नास्ति, उतास्तीति । तदर्थमेतत्कर्तुः प्रतितन्त्रार्थज्ञानं बाधितम्, उताबाधितमिति । तदर्थञ्च अस्य ज्ञानस्य स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वोपदेशमूलकत्वम्, अस्य मनन-सामर्थ्यं च नास्ति, उतास्तीति । यदा नास्ति, तदा एतत्प्रतितन्त्रार्थज्ञानस्य बाधसंभवात् एतत्प्रबन्धस्य अबाधित-न्यायनिबन्धनत्वाभावेन मीमांसालक्षणपरिकरशून्यत्वादिदं शास्त्रमनारम्भणीयमिति पूर्वपक्षे फलफलिभावः॥

यदा चास्य स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वोपदेशमूलकं प्रतितन्त्रार्थज्ञानं मननसामर्थ्यं चास्ति । तदा एतद्दृष्न्यायस्य तत्वज्ञानस्य च अबाधिततया उक्तप्रबन्धस्य अबाधितन्यायनिबन्धनत्वसंभवात् मीमांसा (त्व) संभवेन परिकरसत्त्वादिदमारम्भणीयमिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु; वेदान्तसारवाक्यसंग्रहरहस्यत्रयस्य विषयत्वात्प्रतितन्त्रार्थप्रमायां करणसंभवेऽपि तावन्मात्रा-त्रार्थनिर्णयः कर्तुं शक्यते । मीमांसालक्षणपरिकराभावात् । व्याकरणादिवत् मीमांसायाः परिकरत्वम् * पुराणन्याय-मीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश * इत्यादिभिरुक्तम् । * धर्मे प्रतीयमाने हि वेदेन करणात्मना । इति कर्तव्यताभागं मीमांसा पूरयिष्यति ॥ * इत्यभियुक्तैरप्युक्तम् ॥

न चास्य प्रबन्धस्य मीमांसात्वसंभवः । अर्वाचीनजडमतिभिः लौकिकवाक्यानामिव वेदान्तसारभूताना-मत्यन्तालौकिकार्थानां वाक्यानां स्वोत्प्रेक्षितन्यायैरर्थनिर्णयस्य कर्तुमशक्यत्वात् । प्रत्युत एतत्प्रबन्धनिबद्धन्यायानां धर्मत्यागप्रापकान्तरासाधनत्वादिसाधकानां वेदविरुद्धत्वेन तर्काभासत्वमेव । तदुक्तम् * आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः * इति । अतः परमर्षिभिः न्यायप्रज्वलितचेतोभिरेव अलौकिकवाक्यमीमांसाकार्या । भवदभिमतप्रतितन्त्रसिद्धार्थाः न केनापि महर्षिणा मीमांसिताः । न वा वेदान्त-वाक्यविचारेण (रै) दंपर्येण प्रवृत्तैस्सूत्रकारैर्दिङ्मात्रं वा सूचितम् ॥

न च इतिहासश्रेष्ठश्रीरामायणमहाभारताभ्यां अर्थनिर्धारणात् परमर्षिवचनानुगुण्यमस्तीति वाच्यम्; मीमांसया निर्णीते वेदार्थे तदुपबृंहणस्य तत्संवादितया तत्स्थिरीकरणार्थत्वेन मीमांसाया एवान्तरङ्गत्वात् । साधन-प्रपत्तिपरवेदान्तवाक्यजातं तु, * नानाशब्दादिभेदात् * पुरुषविद्यायामपि चेतरेषामनाम्नानात् * इत्यादिभिस्सूत्रकारै-श्चिन्तितम् । ततश्च साधनप्रपत्तेस्सूत्रकारेण सूचितत्वात् आधुनिकैः तदनुसारेण एतद्विषयप्रबन्धनिर्माणमुपपद्यते । तस्मात् त्वदभिमतप्रतितन्त्रार्थपरत्वेन वेदान्तवाक्यस्य कस्यापि केनचिन्महर्षिणाऽपि चिन्तितत्वादर्शनात् । इदानीं स्वोत्प्रेक्षितन्यायानां तर्काभासत्वसंभवाच्च मीमांसाविरहान्नेदमारम्भणीयमिति ॥

अत्रोच्यते – (अरुदियिडुवदु) – वक्ष्यमाणप्रबन्धेन न्यायनिबन्धनात्मना वेदार्थनिर्णयं करोमीत्यर्थः ।

अयं भावः — सूत्रत्वं नाम न तावज्जातिविशेषः । किंतु, * अल्पाक्षरम् * इत्यादिलक्षणयुक्तत्वम् ॥ तच्च आधुनिकवाक्येष्वपि संभवति । अत एवाद्यापि भाषान्तरविषये, काव्यालङ्कारादिविषये च बुद्धिसौक्ष्म्याल्लक्षणसूत्र-प्रणेतारो दृश्यन्ते । ततश्च अप्रतिहतन्यायनिबन्धनत्वमेव सूत्रत्वम् । तच्च वक्ष्यमाणस्याप्यव्याहतम् ॥

न च वेदान्तसारवाक्यानामत्यन्तालौकिकानां आधुनिकजडमतिभिरशक्यार्थदर्शनत्वात्तद्विषयसूत्रप्रणयना-संभवः । उक्तचोद्यस्य व्यासादावपि तुल्यत्वात् । न च तस्य स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वतयाऽलौकिकार्थ-विषयसूत्रप्रणयनं संभवतीति वाच्यम्; योगसिद्धौ तत्त्वज्ञानम्, तत्त्वज्ञाने सति योगसिद्धिरित्यन्योन्याश्रयात् ॥

यदि, व्यासेन पूर्वाचार्यपरंपराप्राप्तपरावरतत्त्वज्ञानवतः पराशरादेस्सकाशादेव वेदार्थान् श्रुत्वा, श्रुतानां जगद्ब्रह्मणोश्शरीरशरीरिभावादीनां प्रतितन्त्रार्थानामनुगुणन्यायैः स्वयोगमहिमकृतबुद्धिसौक्ष्म्यकृतैः श्रुतार्थमननरूप-न्यायनिबन्धनं कृतमिति मन्यसे, तर्हि, निर्हेतुकभगवत्कटाक्षलब्धपरावरतत्त्वयाथात्म्यविद्भिः पराङ्कुशादिसूरिभिरुप-देशतः प्रबन्धैश्च प्रोक्तानां तत्तदाचार्यपरम्पराप्राप्तानां प्रतितन्त्रार्थानां भगवन्निर्हेतुकरक्षकत्वादीनां स्वाचार्यमुखाच्छ्रुतानां स्वयोगमहिमलब्धबुद्धिविशेषेणोत्प्रेक्षितन्यायविशेषैः श्रुतप्रतितन्त्रार्थानुगुणैर्मननरूपन्यायनिबन्धनात्मकसूत्रसंदर्भशास्त्र-निर्माणमुपपद्यत इति पश्यतु भवान् ॥

न च वेदविरुद्धार्थत्वात्तर्काभासता, तदविरोधस्य तत्र तत्र वक्ष्यमाणत्वात् । तस्मादस्मिन् शास्त्रे वाक्य-विचारात्मकाः प्रमाणाविरुद्धा न्याया व्युत्पाद्यन्त इति अस्य मीमांसारूपत्वादिदं शास्त्रमारम्भणीयमिति ॥

अत्रायं संग्रहः :—

प्रमितौ प्रतितन्त्राणां सारो यद्यपि साधनम् । मीमांसारहितं नेदमारभ्यमिति चेन्न तत् ॥

निर्हेतुककृपालब्धतत्त्वयाथात्म्यदर्शिनाम् । शठजिन्मुनिमुख्यानामुपदेशात्क्रमागतात् ॥
संसिद्धाः प्रतितन्त्रार्था न्यायैश्चलितचेतसाम् । न्यायैर्निरूपिताश्चात्र तस्मादारभ्यतामिति ॥

इति मीमांसानिरूपणाधिकारः ॥ २ ॥

॥ ३ ॥ अथोपबृंहणनिरूपणाधिकारः ॥

(स्मृतीतिहासपुराणङ्गळाले) मीमांसारूपेतिकर्तव्यतासिद्धावपि संवाद्युपबृंहणाभावादनारंभणीयमिति शङ्कया संगतिः । इदं शास्त्रमनारम्भणीयमुतारम्भणीयमिति संशयः । तदर्थं न्यायनिर्णीते प्रतितन्त्रार्थे उपबृंहणसंवादो नास्ति ? उतास्तीति । तदर्थं व्यासादीनां स्मृतिप्रणेतृणामुक्तप्रतितन्त्रार्थज्ञानं नास्ति ? उतास्तीति । तदर्थं निष्ठाभावो ज्ञानाभावद्योतकः ,उत नेति । यदा निष्ठाभावो ज्ञानाभावद्योतकः; , तदा महर्षीणां प्रतितन्त्रार्थज्ञानाभावात् तद्विषयस्मृतिप्रणयनं न संभवतीति उपबृंहणाभावादिदं शास्त्रमनारम्भणीयमिति पूर्वपक्षे फलफलिभावः ॥

यदा निष्ठाभावात् ज्ञानाभावोऽवगन्तुं न शक्यते तदा तेषां प्रतितन्त्रार्थज्ञानसंभवात् तद्विषयस्मृतिप्रणयनसंभवेनोपबृंहणसत्त्वादिदं शास्त्रमारम्भणीयमिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु नेदं शास्त्रमारम्भणीयम् । वेदान्तसारशास्त्रात्मकस्य वाक्यतर्करूपस्य एतत्प्रबन्धस्यैव मीमांसात्वेन प्रतितन्त्रार्थविशेषप्रमित्युत्पत्तावपि महर्षिसंवादाभावे जाताऽपि सा संशयपदमापन्ना भवतीति, उपबृंहणस्यापि अर्थनिर्णयसामग्रीत्वं वर्तते । तदुक्तम् * इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ * इति । * पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः * इति च । न च स्मृतीतिहासपुराणेषु प्रस्तुतशास्त्रव्युत्पाद्यप्रतितन्त्रार्थानुगुणानि वचनानि संभवन्ति । भवदभिमतप्रतितन्त्राणां महर्षिभिरदृष्टत्वात् । महर्षिभिरपीतः पूर्वमदृष्टाः वेदान्तप्रतिपन्नास्तत्तात्पर्यसिद्धाः भगवन्निर्हेतुककटाक्षविशेषेण तत्त्वदर्शिभिरुपदेशादागताः अस्मिन् शास्त्रे प्रतिपाद्यन्त इति हि वर्ण्यते । न ह्युक्तज्ञानं महर्षीणां संभवति; भगवन्निर्हेतुककटाक्षाविषयत्वात् । स्वयत्नलब्धज्ञानानां परिमितत्वेन तत्त्वयाथात्म्यगोचरत्वासिद्धेः । तस्मात् , प्रतिपाद्यार्थानुगुणोपबृंहणाभावान्नेदमारम्भणीयमितिप्राप्ते,

उच्यते (स्मृतीतिहासपुराणङ्गळाले) अस्मदभिमतप्रतितन्त्रार्थानुगुणस्मृतीतिहासपुराणविशेषाणां नासंभव इति तैः वेदान्तसारार्थो निर्णीयते इत्यर्थः ।

अयमभिप्रायः ; महर्षीणां भगवन्निर्हेतुकोपायत्वलक्ष्मीपुरुषकारत्वादिप्रतितन्त्रार्थज्ञानाभावेऽपि तैः स्वग्रन्थप्रतिपाद्यचेष्टितादिविशेषेण वेदान्ततात्पर्यार्थानां प्रकाशितत्वात् पुरावृत्तप्रतिपादनप्रवृत्तैः भगवत्तात्पर्यापरिज्ञानेऽपि कथाभागप्रदर्शनोपपत्तेः । तत्प्रकाशकवचनानामुपबृंहणत्वं संभवति । अथवा, पूर्वपूर्वस्मृतिं दृष्ट्वा उत्तरोत्तरस्मृतिप्रणयनात्तदर्थज्ञानाभावेऽपि पर्यायशब्दैस्तच्छायानुकारिस्मृत्यन्तरप्रणयनमुपपद्यते । यद्वा, स्मर्तॄणां वेदान्ततात्पर्यज्ञानं विद्यत एव । तथाऽपि न तेषां तन्निष्ठा जायते, अदृष्टविशेषकारितरुचिविशेषस्याभावात् । तेषां परोपदेशमात्रानुगुणज्ञानसंभवेऽपि निष्ठोपयोगिदृढाध्यवसायाभावोपपत्तेः । अत एवोच्यते; * नरस्य बुद्धिदौर्बल्यादुपायान्तरमिष्यते * इति । अत्र बुद्धिदौर्बल्यादित्युक्तं बुद्धिदौर्बल्यं दृढाध्यवसायाभावः । तस्मात्तेषामुपदेशयोग्यज्ञान-

संभवेन अस्मत्प्रतितन्त्रार्थानुगुणस्मृतिप्रणयनं युज्यते । इत्युपबृंहणानि स्युः ।

संग्रहस्तु,

प्रतितन्त्रार्थविज्ञानं महर्षीणां न विद्यते । निष्ठाभावादतस्तेषां नोपबृंहणसंभवः ॥
अतो नारभ्यतां शास्त्रमिति चेन्न ह्यसंभवः । महर्षिभिस्स्वप्रबन्धे चेष्टितादिप्रदर्शनात् ॥
ज्ञानाभावेऽप्यनुष्ठानं पुरावृत्तमशेषतः । साक्षात्कृत्य तदर्थानामुपबृंहणसंभवात् ॥
अथवा पूर्वपूर्वासां स्मृतीनां दर्शनात्पुनः । तत्तच्छायानुसारेण स्मृतिप्रणयनं भवेत् ॥
यद्वोपदेशयोग्यं तत् ज्ञानं दुर्बलमिष्यते । तेषामपि ततश्चेदं शास्त्रमारभ्यतां बुधैः ॥

इत्युपबृंहणनिरूपणाधिकारः ॥ ३ ॥

॥ ४ ॥ अथ पूर्वभागविरोधपरिहाराधिकारः ॥

(स्मृतियाले पूर्वभागत्तिलर्थमरुदियिडक्कडवदु) एवं सामग्रीसत्त्वेऽपि प्रबलप्रमाणप्रतिबन्धात् प्रतितन्त्रार्थप्रमा नोत्पद्यते । इति शङ्काया संगतिः । संशयस्तु, इदं शास्त्रमनारंभणीयम् । उतारंभणीयमिति । तदर्थमिदं प्रमाणं न भवति? उत भवतीति । तदर्थं अस्य पूर्वकाण्डमन्वादिस्मृतिविरोधोऽस्ति? उत नास्तीति । यदा विरोधोऽस्ति तदा बाह्यशास्त्रवदप्रमाणत्वात् अनारंभणीयमिति फलति । यदा च विरोधो नास्ति तदा वेदाविरुद्धत्वेन प्रमाणत्वादारंभणीयमिति सिध्यति ॥

पूर्वपक्षस्तु, नन्वेवमपीदं शास्त्रमनारंभणीयम् । पूर्वकाण्डविरुद्धत्वात् । तदुपबृंहणमन्वादिस्मृतिविरुद्धत्वाच्च । तत्र हि वर्णाश्रमकर्माराध्यं परं ब्रह्मप्रतिपाद्यम् । * आसीदिदं तमोभूतम् * इत्यारभ्य * आपो नाराः * इत्यादिना स्वशास्त्रप्रतिपाद्यकर्माराध्यं परं ब्रह्मेति मनुः । * स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥ * इत्यन्यत्राप्युक्तम् । अत एव * श्रुतिशिरसि विदीप्ते * इत्यत्र श्रुतप्रकाशिकायां * पूर्वकाण्डे दीप्तम् अत्र विदीप्तम् * इत्युक्तम् । एवं वर्णाश्रमकर्माराध्यं ब्रह्म पूर्वकाण्डे प्रतिपन्नम् । एतच्छास्त्रे च * सर्वधर्मान्परित्यज्य * इति सर्वशब्देन वर्णाश्रमधर्मस्यापि त्यागः प्रतिपाद्यते; अतः पूर्वभागविरुद्धमिदमप्रमाणम् ॥

किंच इदं कुदृष्टिशास्त्रत्वादप्यनारंभणीयम् । वेदैकदेशनिरूपणत्वात् । कतिपयवेदान्तसारभूतानि हि निरूप्यन्ते । अस्मत्सिद्धान्ते पूर्वोत्तरभागयोरैकशास्त्र्यमभिहितम् । अत्रोपासकैः विविदिषोत्पत्त्यर्थकतया कर्माङ्गीकारादैकशास्त्र्यं सिद्धम् । साधनप्रपत्तिनिष्ठैर्विद्यासहकारित्वाभावेऽपि वर्णाश्रमप्रयुक्तत्वेन कर्माभ्युपगमादैकशास्त्र्यसिद्धिः । सिद्धोपायनिष्ठैर्विद्याङ्गत्वेन वर्णाद्यर्थत्वेन वा कर्मणामनङ्गीकारात्कर्मकाण्डपरित्यागेनैकशास्त्र्यासिद्धेः, वेदैकदेशनिरूपणमिदं शाङ्करादिग्रन्थवदनारंभणीयमिति चेत्; तत्राह । (स्मृतियाले पूर्वभागत्तिलर्थमरुदियिडक्कडवदु) मन्वादिस्मृतौ प्रतितन्त्रानुगुणविशेषवचनसद्भावस्य पूर्वमुक्तत्वात्, तैर्वचनैः पूर्वभागावसेयकर्मस्वरूपयाथात्म्यमप्यस्माभिरत्र प्रबन्धे निरूप्यत इत्यर्थः । ततश्च, पूर्वभागपरित्यागादत्राप्यैकशास्त्र्यसिद्धिरिति चाभिप्रायः । अयमर्थः, यथा चोपासनशास्त्रे कर्ममीमांसाप्रतिपन्नं स्वर्गादिसाधनत्वं देवतान्तरविषयत्वं च परित्यज्य तदेव विविदि-

षासाधनतया, केवलान्तर्यामिविषयतया च व्यवस्थापितम्; यथा वा; साधनप्रपत्तिशास्त्रे कर्ममीमांसाप्रतिपन्नमाकारद्वयम्; ब्रह्ममीमांसावसेयं विविदिशासाधनत्वं च परित्यज्य वर्णाश्रमप्रयुक्तत्वस्वार्थकैङ्कर्यत्वाद्याकारविशिष्टतया कर्म प्रतिपादितमित्युभयत्रापि शास्त्रैक्यसिद्धिः । नापि पूर्वकाण्डविरोधः । तथा अस्मिन् शास्त्रे कर्मणः पूर्वमीमांसाप्रतिपन्नमाकारद्वयम्, (ब्रह्ममीमांसावसेयमाकारद्वयम्) साधनप्रपत्तिशास्त्रप्रतिपन्नवर्णादिप्रयुक्तत्वं स्वार्थत्वादिकं च परित्यज्य केवलाज्ञाप्रयुक्तत्वपरार्थताऽवतारविषयत्वादिना तदेव कर्म प्रतिपाद्यत इति शास्त्रैक्यसिद्धिरिति न कुदृष्टिग्रन्थतुल्यता । नापि पूर्वभागविरोधाद्बाह्यत्वम् । यथा च कर्मशास्त्रप्रतिपन्नस्वर्गादिसाधनत्वपरित्यागेऽपि तत्साधनत्वादिबोधकांशस्या मुमुक्षुविषयतया प्रामाण्यस्वीकारात् ब्रह्मशास्त्रस्य तदविरोधः; यथा वा, उपासनशास्त्रप्रतिपन्नविद्याङ्गत्वपरित्यागेऽपि तस्य शक्तविषयत्वकल्पनात् न्यासशास्त्रस्य तदविरोधः एवं फलप्रपत्तिशास्त्रस्यापि कर्मशास्त्रोक्तस्वर्गादिकारणत्वादीनामुक्ततद्विषये प्रामाण्यस्वीकारात्, उक्तशास्त्रत्रयप्रतिपन्नवर्णाश्रमप्रयुक्तत्वान्तर्यामिविषयत्वादेः स्वतन्त्रविषयतया प्रामाण्यस्वीकाराच्च, कर्मकाण्डाविरोधः । तस्मादस्य वेदान्तसारशास्त्रस्य पूर्वभागेन सहैकशास्त्रत्वात्तदविरोधाच्च, न्यासोपासनशास्त्रवदेवारम्भणीयत्वसिद्धिरिति ॥

संग्रहस्तु :—

वर्णादिधर्मत्यागोक्तया पूर्वभागविरोधतः । अप्रमाणमिदं शास्त्रमारभ्यं नेति चेन्न तत् ॥
आज्ञाप्रयुक्त्या तत्कार्यमित्यत्रैव समर्थनात् । वर्णाद्यर्थत्वशास्त्राणां स्वतन्त्रे सावकाशतः ॥
शास्त्रैक्यमविरोधश्च पूर्वभागेन सिध्यति । तस्मादारम्भयोग्यं तदिदं शास्त्रं कृतात्मनाम् ॥

इति पूर्वभागविरोधपरिहाराधिकारः ॥ ४ ॥

॥ ५ ॥ अथ वेदान्तविरोधपरिहाराधिकारः ॥

(मत्तैयिरण्डालुमुत्तरभागत्तिलर्थमरुदियिडक्कडवदु) एवमपि, प्रतिबन्धकान्तरसत्त्वान्नोक्तसामग्रीमात्रात्प्रतितन्त्रप्रमोत्पत्तिरिति शङ्कया सङ्गतिः । संशयश्च । इदं शास्त्रमनारम्भणीयम्, उतारम्भणीयमिति । तदर्थमिदमप्रमाणम्, उत प्रमाणमिति । तदर्थम् इदमुत्तरभागविरुद्धम्, उताविरुद्धमिति । यदा विरुद्धम्, तदा अप्रमाणत्वादनारम्भणीयम् । यदा चाविरुद्धम्, तदा प्रमाणत्वादारम्भणीयमिति पूर्वोत्तरपक्षयोः फलफलिभावौ ॥

पूर्वपक्षस्तु, * सम्यङ्न्यायकलापेन महता भारतेन च । उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥ * इति साक्षाद्विष्णुप्रणीतोपबृंहणप्रधानब्रह्मसूत्रविरुद्धत्वात्, तद्विरोधेन वेदान्तेनापि विरोधाच्च, तद्विरुद्धमिदमप्रमाणत्वादनारम्भणीयम् । वेदान्ते न्यासोपासनयोर्भगवत्प्राप्तिहेतुत्वं प्रपञ्चितम् । अत्र (प्रापकान्तरपरित्यागेत्यादिना) तयोरनुपायत्वस्वरूपविरुद्धत्वादिकमुच्यते । किंच सिद्धोपायस्यैव मोक्षहेतुत्वं न्यासोपासनयोः फलत्वं चात्रोच्यते । ब्रह्मसूत्रे न्यासोपासनयोः प्रसदनहेतुत्वं, ईश्वरस्य फलप्रदत्वमात्रं हि समर्थितम् । न तु तदुभयनिरपेक्षत्वलक्षणं सिद्धोपायत्वमपि । अतः अस्य वेदान्तविरुद्धत्वाद्बाह्यशास्त्रवदनारम्भणीयत्वम् । वेदान्तपरित्यागेन तत्सारवाक्यमात्रनिरूपणात्कुदृष्टिशास्त्रत्वं चेति चेत् तत्राह – (मत्तैयिरण्डालुमुत्तरभागत्तिलर्थमरुदियिडक्कडवदु) इति । गद्यान्तः, इतिहासपुराणाभ्यां सूत्रनिर्णीतार्था एव अत्र विशेषतो निरूप्यन्त इत्यर्थः ॥

अयं भावः । वेदान्ते स्वतन्त्रं प्रति भक्तिन्यासयोः स्वरूपानुरूपत्वम्, उपायत्वं चोक्तम् । अत्र परतन्त्रं प्रति स्वरूपविरुद्धत्वादि प्रतिपाद्यते । अतः अधिकारिभेदान्न विरोधः । नापि वेदान्तशास्त्रपरित्यागः । पूर्वद्विकोक्तब्रह्मकारणत्वादेरुत्तरद्विकोक्तस्य साधनस्य फलस्य चात्राभ्युपगमात् । भक्तिप्रपत्त्योस्तत्रोक्तसाधनत्वस्य फले स्वार्थत्वस्य च स्वतन्त्रविषयत्वाभ्युपगमात् तदंशेऽपि प्रामाण्यं स्वीकृतम् । तत्रोक्तन्यासोपासनस्वरूपोपजीवनेन, अत्र न्यासस्य स्वरूपयाथात्म्यज्ञानान्तर्भावमुपासनस्य प्राप्यरुचित्वेन साध्यभक्तित्वं च सूत्रकाराभिप्रेतं प्रतिपाद्यते । तदुभयनिरपेक्षसिद्धोपायत्वमपि * परमतः * इत्याद्यधिकरणसिद्धान्ते * सामान्यात्तु * उपपत्तेश्च * इति सूत्राभ्यां प्रतिपादितम् । तद्विषयतया भाष्यकारैः * एतं सेतुं तीर्त्वा अन्धस्सन्ननन्धो भवति * नायमात्मा प्रवचनेन लभ्यो न मेधया * इत्यादिश्रुतिरुदाहृता ॥

न चात्र सेतूपायादिशब्दाः फलप्रदत्वपराः * फलमत उपपत्तेः * इत्यत्र फलप्रदत्वस्योपपादनात् । न च * फलमत उपपत्तेः *इत्यत्र फलप्रदत्वम्, * परमतः * इत्यत्र फलतत्प्रदयोरैक्यमात्रं प्रतिपाद्यते इति वाच्यम् । पूर्वाधिकरण एव तदुभयसिद्धेः उत्तराधिकरणवैयर्थ्यात् ॥

न च उत्तराधिकरणस्य अपूर्ववादनिरासमात्रे तात्पर्यमिति वाच्यम् । तत्पादस्य प्राप्यतृष्णासिद्धये कल्याणगुणप्रतिपादकत्वेन उत्तराधिकरणस्य तत्रासाङ्गत्यापत्तेः । तस्मात्पूर्वाधिकरणे उत्तीर्णनिराकरणमुखेन भगवतो निरपेक्षोपायत्वं प्रतिपाद्यत इत्यकामेनापि स्वीकार्यम् । एवं सूत्रकारोक्तसिद्धोपायस्यैवात्र प्रतितन्त्रप्रधानत्वेन प्रतिपादनात् न तद्विरोधः, न वा वेदान्तविरोध इति ॥

किंच श्रुतिगतसेतुशब्दः भाष्ये उपायशब्देन व्याख्यातः । उपायत्वं च फलप्रदत्वाद्भिन्नम् । * उपाये गृहरक्षित्रोः * इति भेदेन कीर्तनात् । न च तयोर्भेदनिरूपणाशक्यता । फलसाधनभक्तिप्रदस्योपायत्वात् । फलप्रदस्य रक्षकत्वाच्च ॥

किंच * परमतः * इत्याद्यधिकरणोक्तमुपायत्वं यदि फलप्रदत्वम्, तर्हि तदनुवादेन प्राप्यैक्यं तत्र न विधेयं स्यात् । फलप्रदत्वस्येतः पूर्वमसिद्धत्वात् । यद्यत्रैवाधिकरणे फलप्रदत्वं प्राप्यैक्यं चेत्युभयमपि विधेयम्, तदा पूर्वपक्षे फलप्रदत्वस्य प्राप्याद्भेदसाधकतया हेतुत्वेनोपादानं न सिध्येत् । * फलमतः * इत्युत्तराधिकरणे फलप्रदत्वविधानं च व्याहन्यते । यद्येतदुभयदोषपरिजिहीर्षया * फलमतः * इत्यधिकरणे फलप्रदत्वं विहितम्; तदेव हि * परमतः * इत्यधिकरणेऽनूद्य फलैक्यं विधीयते । पूर्वपक्षेऽपि तदधिकरणसिद्धं फलप्रदत्वमेव हेतुत्वेनोक्तमिति मन्यसे; तदेतत्तदा शोभते; यदि * फलमतः * इत्यधिकरणं * परमतः * इत्यधिकरणात्पूर्वभावि स्यात् । तत्तु विपरीतम् । यद्यन्यत्रैव सिद्धं फलप्रदत्वं पूर्वपक्षे हेतुत्वेनोपन्यस्यते, तदेव तत्सिद्धान्तेऽनूद्यत इति मन्यसे; एवमप्युत्तराधिकरणवैयर्थ्यम् । न्यायनिरपेक्षम्; अन्यत्रैव फलप्रदत्वस्य सिद्धत्वात् । नापि तस्य न्यायनिरपेक्षसिद्धिर्युक्ता । मीमांसकैरपूर्वस्य फलप्रदत्वाभ्युपगमेन भगवतस्तथात्वसिद्धेर्न्यायसापेक्षत्वात् । न च * फलमतः * इत्यधिकरणे अपूर्वस्य फलप्रदत्वमात्रनिराकरणम्; भगवतस्तथात्वं पूर्वाधिकरणे न्यायनिरपेक्षश्रुतिमात्रात्सिद्धमिति वाच्यम् । तथात्वे उत्तराधिकरणस्य कल्याणगुणपरे पादे सङ्गतिर्न सिध्येत् । तस्मान्न्यायनिरपेक्षश्रुतिसिद्धं फलप्रदत्वभिन्नमुपायत्वं पूर्वपक्षे हेतुत्वेनोपन्यस्तम् । सिद्धान्तेऽपि तदनुवादेनोपायोपेयैक्यं

प्रसाधितम् । उत्तराधिकरणेऽपि उपायत्वादर्थान्तरभूतं फलप्रदत्वमपूर्वनिराकरणमुखेन स्थाप्यत इति सूत्रकारैः फलप्रदत्वभिन्नस्योपायत्वस्योक्तत्वात् सिद्धोपायपरमिदं शास्त्रं सूत्रकारात्यन्ताभिमतमारम्भणीयमिति ॥

संग्रहस्तु ; —

न्यासादेरनुपायत्वं सिद्धे तन्निरपेक्षताम् । वदत्सूत्रविरुद्धत्वान्नारभ्यमिति चेन्न तत् ॥
उत्तीर्णवादसिद्धान्ते प्रपत्त्याद्यनपेक्षताम् । सिद्धोपायस्य वदति सूत्रकृत्तन्निरीक्ष्यताम् ॥
फलप्रदत्वमेवोक्तं विभोस्तत्रेति चेन्मतम् । तदा तदनुवादेन न फलैक्यविधिर्भवेत् ॥
फलदत्वं फलैक्यं च विधेयं तत्र चेत्तदा । हेतुत्वं फलदत्वस्य पूर्वपक्षे न सिध्यति ॥
उत्तरे चाधिकरणे तद्विधिश्च न सेत्स्यति । परस्मिंस्तद्विधिः पूर्वमनुवाद्यं तदिष्यते ॥
पूर्वपक्षे च हेतुत्वं तस्य स्यादिति चेन्न तत् । तदेवं शक्यते वक्तुमुत्तीर्णापूर्ववादयोः ॥
यदा क्रमविपर्यासः स तु नात्र प्रतीयते । सिद्धमन्यत्र गोप्तृत्वमनूद्यं साधकं च तत् ॥
उत्तरं चाधिकरणं परस्य क्षेपतत्परम् । इति चेत्तन्न पादेऽस्मिन् संगतं न भवेद्यतः ॥
ततश्च सूत्राभिमतोपायत्वस्थापकं परम् । प्रारभ्यतामिदं शास्त्रं प्राज्ञैः प्रद्वेषवर्जितैः ॥

इति वेदान्तविरोधपरिहाराधिकारः ॥५॥

॥६॥ अथ पुरुषकारत्वनिर्हेतुकत्वसमर्थनाधिकारः ॥

लोकवेदयोरितिहासस्य पूर्वोपादानम् *अभ्यर्हितं पूर्वम्* इति न्यायात्तस्य प्राबल्यपरमित्याह (इवै इरण्डिलुम् वैत्तुक्कोण्डु इतिहासम् प्रबलम्) (अत्ताले अदु मुर्पट्टदु) एवमधिकारपञ्चकेन वेदान्तसारशास्त्रस्यारभ्भणीयत्वं समर्थितमुपोद्घातप्रकरणे । इतः परं (इतिहासेत्यारभ्य) शास्त्रं प्रवर्तते । प्रथमे प्रतितन्त्रप्रमायाः करणानुपपत्तिः परिहृता । द्वितीये मीमांसालक्षणेतिकर्तव्यताभावशङ्का परिहृता । तृतीये उपबृंहणलक्षण-परिकराभावशङ्का निरस्ता । चतुर्थे पूर्वभागरूपप्रबलप्रमाणप्रतिबन्धकशङ्का परिहृता । पञ्चमे वेदान्तरूप-प्रतिबन्धकशङ्का परिहृता ॥

एवमधिकारपञ्चकेन प्रतितन्त्रप्रमासामग्री पुष्कला निरूपिता । एवं प्रमासामग्री भवतु । प्रमाविषय-प्रतितन्त्रार्थः क इत्याकाङ्क्षायां स एवोच्यत इत्युपोद्घातशास्त्रयोस्सङ्गतिः । तत्र प्रथमपरिच्छेदे प्रधानप्रतितन्त्रार्थो निरूप्यते । प्रधानश्च *लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया । रक्षकस्सर्वसिद्धान्ते वेदान्तेऽपि च गीयते ॥* इत्युक्तशेषिमिथुनरक्षकत्वस्य अहेतुकत्वम् । इदं रक्षकत्वं सिद्धान्तान्तरे सर्वत्र सहेतुकमङ्गीकृतम् । तत्र लक्ष्म्या रक्षकत्वं पुरुषकारभावः । ईश्वरस्य तथात्वमुपायभावः । तदुभयं निर्हेतुकं चेति प्रथमे प्रतिपाद्यते । द्वितीयपरिच्छेदे, एतन्निष्ठाधिकारिणो वृत्तिविशेषः प्रतितन्त्र उच्यते । वृत्तेः प्रपत्तिशेषत्वात् प्रथमपरिच्छेदार्थः प्रधान इत्येकवाक्यत्वम् । तत्र प्रथमप्रकरणे विशेषणभूतलक्ष्मीरक्षकत्वं शोध्यते । द्वितीयप्रकरणे ईश्वरोपायत्व-मिति विभागः । अस्मिन्पुरुषकारप्रकरणे पुरुषकारत्वस्य निर्हेतुकत्वम् । तस्य षडङ्गयोगनिष्ठविषयत्वाभावः, पुरुषकारसद्भावे प्रमाणम्, लक्ष्म्या उपायत्वाभावः, अणुत्वम्, शरणागतिविद्यायामुपलक्षणत्वेन वेद्यत्वं चेति षडर्थाः प्रतिपाद्यन्ते ॥

यद्यपि भगवदुपायत्वं प्रतितन्त्रप्रधानम् । लक्ष्मीपुरुषकारत्वं च तदनुबन्ध्यप्रधानम् । तथाप्युपायत्वस्य पुरुषकारपूर्वकत्वात् शास्त्रकारैर्मन्त्रार्थविवरणे प्रवृत्तत्वाच्च प्रथमं श्रीशब्दार्थो निरूप्यते ॥

(इतिहासश्रेष्ठमान श्रीरामायणत्ताल् शिरैयिरुन्दवळेत्तम् शोल्लुगिरदु) अत्र पुरुषकारत्वस्य निर्हेतुकत्वमुच्यते । यद्यपि "सति धर्मिणि धर्माश्चिन्त्यते" इति पुरुषकारत्वसाधनानन्तरं तन्निर्हेतुकत्वचिन्ता कार्या । तथाऽपि, पूर्वपक्षे वापक्षत्वेन एकदेशिभिः पुरुषकारत्वाभ्युपगमात् तत्र नातीव विवाद इति प्रथमं तन्निर्हेतुकत्वमुच्यते ॥

अत्र संशयः । लक्ष्मीपुरुषकारत्वं सहेतुकम्, उत निर्हेतुकमिति । तदर्थं तस्या रावणभवनवासस्तन्निर्हेतुकत्वमवगमयति, उत नेति । तदर्थं गमकत्वे प्रमाणान्तरविरोधोऽस्ति, उत नास्तीति । यदा विरोधोऽस्ति, तदा रावणभवनवासस्य निर्हेतुकत्वानवगमकतया तत्र प्रमाणाभावात् सहेतुकत्वमिति पूर्वपक्षे फलफलिभावः । यदा प्रमाणान्तरविरोधो नास्ति, तदाऽस्य निर्हेतुकत्वावगमकतया प्रमाणसत्त्वान्निर्हेतुकत्वसिद्धिरिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु मन्त्ररत्ने श्रीशब्दस्य * श्रीञ् सेवायाम् * इति धातौ श्रीयत इति काचिद्व्युत्पत्तिरवगता; साच *श्रीयते चाखिलैर्नित्यम् * इत्यादिभिरुपबृंहिता । तत्र प्रतिपन्नमखिलाश्रयणीयत्वं प्रपत्तव्यत्वमेव । एवं च स्मर्यते * एवं प्रपद्य लक्ष्मीं तां श्रियं सद्गुरुभावतः * इति । * अखिलजगन्मातरमस्मन्मातरमशरण्यशरण्यामनन्यशरणश्शरणमहं प्रपद्ये * इति भाष्यकारैरनुष्ठितं च । अत एव भगवत्समाश्रयणस्य गुरुपरम्परानुसंधानपूर्वकत्वात् तत्र "श्रियै नमः" इति लक्ष्म्यां भरसमर्पणं सर्वैरनुष्ठीयते । इयं च लक्ष्मीविषया प्रपत्तिः पुरुषकारभावार्था । तत्र * आश्रयस्वैनमच्युतम् * इति फलश्रुतेः । * भगवच्चरणारविन्दशरणागतिर्यथावस्थिताऽविरतास्तु मे ।* इति श्रीशरणागतिकृत्वेनोक्तं च । एवं प्रपत्तेः पुरुषकारभावसाधनत्वावगमात्स न निर्हेतुकः ॥

किंच यदि तस्य निर्हेतुकत्वम्, तदा तस्य सर्वत्र प्रवृत्तिसंभवेन सर्वमुक्त्यापत्तिः, तन्निर्हेतुककृपायाश्चेतनसामान्यविषयत्वात् तत्कृतेश्वरवशीकरणस्य चाप्रतिहतत्वात् । एवं सोपबृंहणसंप्रदायोपपत्तिकस्य श्रीशब्दस्य सहेतुकत्वे प्रमाणत्वात्, तद्विरोधेन रावणभवनवृत्तान्तस्य न पुरुषकारभावनिर्हेतुकत्वावगमकत्वम् । यदि, देवस्त्रीबन्धविमोचनार्थः तद्गृहवासः केवलकृपाकार्य इति तन्निर्हेतुकत्वमुच्येत, तन्न सिध्यति । देवैः पूर्वमेव शरणागतत्वात् । यदि, राक्षसीनां विषये तथात्वम्, तदपि न । त्रिजटावाक्येन तासामपि शरणागतत्वात् । तस्मात्पुरुषकारभावनिर्हेतुकत्वे प्रमाणाभावात्सहेतुकत्वमिति ॥

सिद्धान्तस्तु, लक्ष्मीपुरुषकारभावो द्विविधः । चेतनविषयो भगवद्विषयश्चेति; द्विविधोऽपि निर्व्याज एव । अवतारवृत्तान्तेन तथात्वावगमात् । तत्र प्रथमे * मित्रमौपयिकं कर्तुं रामस्स्थानं परीप्सिता । वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ॥ विदितस्स हि धर्मज्ञश्शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ * इह सन्तो न वा सन्ति सतो वा नानुवर्तसे । तथापि विपरीता ते बुद्धिराचारवर्जिता ॥ * इत्यादि प्रमाणम् । एवं चेतनं श्रावयतीति व्युत्पत्तिसिद्धचेतनविषयघटकत्वे हेत्वभावो दृष्टः । द्वितीयेऽपि

राक्षसीविषये * भवेयं शरणं हि वः * इति निर्व्याजं प्रतिज्ञाय, मारुतेर्भयप्राप्तौ * पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥ राजसंश्रयवश्यानां कुर्वन्तीनां पराज्ञया । * इत्याद्युक्ते रीश्वरवशीकरणं किंपुनर्न्यायसिद्धमिति तदेव प्रमाणम् । एवमीश्वरं श्रावयतीति व्युत्पत्तिसिद्धेश्वरघटकत्वे हेत्वभावो दृष्टः ॥

न च * तदलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् । ......अलमेषा परित्रातुं राक्षस्यो महतो भयात् । ......अभियाचाम वैदेहीं ......प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा * इत्यानुकूल्यसंकल्पाद्यङ्गकात्मनिक्षेपस्य त्रिजटोपदिष्टत्वात् तासामपि उपायानुष्ठानमस्तीति वाच्यम् । उपदेशसंभवेऽ पि ताभिस्तथानुष्ठितमित्यत्र मानाभावात् । न च तासां त्रिजटाभिमानाद्रक्षणोपपत्तिः । विभीषणानीतराक्षसानामिव तासां त्रिजटाभिमाननिष्ठत्वेऽ पि मानाभावात् । देहसंबन्धमात्रस्य रावणेऽपि तुल्यत्वात् । अतस्तद्विषये पुरुषकारभावो निर्हेतुकः । एवं काकविषयेऽ पि * पुरतः पतितं देवी धरण्यां वायसं तथा । तच्छिरः पादयोस्तस्य योजयामास जानकी ॥ * इति निर्हेतुकत्वमवगम्यते । अकारोदितरक्षकत्वस्येव श्रीशब्दोक्तपुरुषकारभावस्योपाध्यश्रवणेन निरुपाधिकत्वसिद्धेः । तदुपबृंहणश्रीरामायणे तदनुष्ठानप्रकाशकेऽ पि उपाध्यदृष्टेश्च पुरुषकारभावो निर्व्याजः ॥

न च गुरुपरम्परायां तत्तत्समाश्रयणं भरसमर्पणरूपम्, किंतु तच्छेषत्वानुसन्धानरूपम् । अन्यथा * श्रीधराय नमः * इत्यस्यापि तथात्वे मन्त्रे तदनुष्ठानासिद्धिप्रसंगात् । तस्मादुपायानुष्ठानस्य स्वशेषत्वानुसन्धानाधिकारत्वात् तत्तदीयानां सर्वेषामपि शेषित्वात् पूर्णानुसन्धानसिद्धये, नमश्शब्दस्य भक्तिवाचकत्वेन गुरुभक्तिपूर्वकत्वनियमात्तद्विद्याधिगमस्य तद्भक्तिसिद्धये च गुरुपरम्परानुसंधानम्, न तूपायानुष्ठानरूपत्वेन । न च पुरुषकारत्वस्य निर्हेतुकत्वे सर्वविषयत्वप्रसंगः । तस्याकिंचनविषयत्वेनातिप्रसंगाभावात् । न च * श्रीयते चाखिलैर्नित्यम् * इति समाश्रयणमुच्यते । * श्रयते च परं पदमित्यत्रापि तत्प्रसंगात् । भाष्यकाराद्यनुष्ठानञ्च न साधनत्वेन काकादिषु व्यभिचारात् किंतु उपायपूर्त्यर्थमेव । तस्माल्लक्ष्मीपुरुषकारभावो निर्हेतुक इति ॥

संग्रहस्तु ;

गुरुपङ्क्तौ श्रियः पूर्वं प्रपत्तिर्विहिता तथा । भाष्यकारैः श्रिता लक्ष्मीर्घटकत्वस्य सिद्धये ॥
"एवं प्रपद्य लक्ष्मीं ताम्" इत्यादिस्मृतिदर्शनात् । सर्वमुक्तिप्रसंगाच्च घटकत्वं सहेतुकम् ॥
इति चेत्तत्तन्मन्त्रोक्तोपायानुष्ठानसिद्धये । तच्छेषत्वानुसन्धानं गुरुपङ्क्तौ विधीयते ॥
श्रीशब्दे घटकत्वस्य नोपाधिश्रवणं तथा । रामायणे न सीताया घटकत्वे स दृश्यते ॥
स्मृतौ प्रपत्तिर्या दृष्टा भाष्यकारैश्च या कृता । श्रियस्स्वतः प्रसन्नत्वात्काकादिव्यभिचारतः ॥
अनुष्ठाने राक्षसीनामभिमानेऽ प्यभावतः । अधिकारस्य पूर्त्यर्थं कृता साऽ पि न साधनम् ॥
सर्वमुक्तिप्रसंगोऽ पि तेनैवदितिवारितः । तस्मात्पुरुषकारत्वमहेतुकमिति स्थितिः ।

इति पुरुषकारत्वनिर्हेतुकत्वनिरूपणाधिकारः ॥ ६ ॥

॥ ७ ॥ अथ षडङ्गे पुरुषकाराभावाधिकारः ॥

(महाभारत) इति वाक्यम्, (उपायवैभवम्) इति वाक्यं च, पाठक्रमादर्थक्रमस्य बलवत्त्वात् ;

द्वितीयप्रकरणे सङ्गतम् । (इतिहासश्रेष्ठेति) वाक्ये वेदान्तार्थः क उपबृंहितो भवतीत्यपेक्षायामाह (इवैयित्यादि)

(पुरुषकारमाम्पोदु कृपैयुम् पारतन्त्र्यमुम् अनन्यार्हत्वमुम् वेणुम्)

लक्ष्म्या उपायभावे भरन्यासस्सापेक्षत्वदर्शनात्, लक्ष्मीपुरुषकारभावेऽपि सापेक्षत्वमस्तीतिशङ्कायां षडङ्गयोगे पुरुषकारत्वमेव नास्ति; कृपादेस्तत्रानवकाशात् इत्युच्यत इति पूर्वोत्तराधिकारयोः सङ्गतिः । साध्योपायभावस्थत्वे तन्न सिध्यतीत्युच्यत इति वा संगतिः ॥

संशयस्तु, लक्ष्मीपुरुषकारभावे, निर्हेतुकत्वं नास्ति, उतास्तीति । तदर्थं षडङ्गप्रपत्तौ पुरुषकारभावोऽस्ति, उत नास्तीति । तदर्थं कृपादेः तत्रोपयोगोऽस्ति, उत नास्तीति । तदर्थं षडङ्गप्रपत्तिः द्वयमन्त्राङ्गिका, उत मूलमन्त्राङ्गिकेति । तदर्थं द्वयमन्त्राङ्गत्वे बाधकं नास्ति, उतास्तीति । यदा नास्ति तदा द्वयमन्त्राङ्गकत्वात् पुरुषकारभावस्तत्रास्तीति कृपाया अपि कथञ्चिद्विनियोगोऽस्तीति षडङ्गप्रपत्तौ पुरुषकारसंभवात् तत्सापेक्षः पुरुषकारभाव इति तन्निर्हेतुकत्वासिद्धिः । यदा द्वयमन्त्राङ्गकत्वे बाधकमस्ति, तदा तन्मन्त्रकत्वाभावात्कृपायाः क्लिष्टगतिर्नाश्रयणीयेति षडङ्गप्रपत्तौ पुरुषकारासंभवात् सापेक्षत्वाभावेन तन्निर्हेतुकत्वसिद्धिरिति पूर्वपक्षे सिद्धान्ते च फलफलिभावः ॥

पूर्वपक्षस्तु, लक्ष्म्या उपायत्वे षडङ्गयोगस्य हेतुत्वं तावदवश्यं वक्तव्यम् । मन्त्रे तथा दर्शनात् । तद्वदेव पुरुषकारभावेऽपि षडङ्गो हेतुः । अन्यथा षडङ्गयोगे पुरुषकारापेक्षा न स्यात् । अष्टाङ्गयोगवत् षडङ्गस्यापि हेतुत्वं तावदव्याहतम् । षडङ्गश्च मन्त्ररत्नप्रतिपाद्यः । अतः तत्रावगतं लक्ष्मीपुरुषकारत्वं षडङ्गप्रपत्तिसापेक्षमिति पुरुषकारनिर्हेतुकत्वमसिद्धम् । मन्त्ररत्ने च षडङ्गः प्रतिपाद्यते । तथा हि; * शरणं प्रपद्ये * इत्यत्र शरणशब्दोपश्लिष्टक्रियापदेन भरन्यास उक्तः । तत्र * गत्यर्था बुध्यर्थाः * इत्यध्यवसायरूपत्वोक्तया 'प्र' इत्युपसर्गेण महत्त्वोपस्थितेश्च महाविश्वास उक्तो भवति । तत्र, उत्तमपुरुषेण अधिकार्युपस्थापकेनाकिञ्चन्योपस्थित्या तत्पुरस्काररूपकार्पण्यं सूचितम् । उपायत्वानुसन्धानस्य गोप्तृत्वविषयतया गोप्तृत्ववरणमप्यन्तर्णीतम् । नारायणशब्दस्य शेष्युपस्थापकतया आनुकूल्यसंकल्पप्रातिकूल्यवर्जनरूपशेषवृत्तिरर्थसिद्धा । अत्र शरणशब्दः * उपाये गृहरक्षित्रोश्शब्दश्शरणमित्ययम् । वर्तते सांप्रतं चैष उपायार्थैकवाचकः ॥ * इति विशेषितत्वादुपायार्थकः * भरन्यासबलादेव स्वभिन्नविनिवृत्तये । अत्रोपायान्तरस्थाने रक्षको विनिवेशितः ॥ * इति । तत्तत्फलसाधनाराधितस्येश्वरस्य सर्वफलोपायत्वे साधारणेऽपि अत्र विशिष्टोपायत्वकथनम्, उपायान्तरस्थाने सहजकारुण्यादिविशिष्टेश्वरस्य निवेशितत्वज्ञापनाय । अत्र भक्तियोगस्थाने प्रपत्तेरेव निवेशितत्वात् कथमीश्वरस्य तथात्वमिति चेत्; अन्यत्राङ्गतया प्रपत्तिं साधनतया भक्तिं चानुष्ठाय प्राप्यं फलम् अत्र भक्तिस्थाने निविष्टेश्वरसहजकारुण्यादवाप्यत इति, तस्य भक्तिस्थाने निवेशितत्वोपपत्तेः । उक्तनिष्कर्षविवक्षया * उपायार्थैकवाचकः * इत्युक्तिः । ननु तर्हि, गोप्तृत्ववरणस्यान्तर्णीतत्वेन फलप्रार्थनाया अत्रैव जातत्वात् उत्तरवाक्ये तत्प्रार्थनाऽधिकेति चेत्; न, अकिंचनस्य ममोपायान्तरस्थाने स्थित्वा अभिमतफलं प्रयच्छेति पूर्वोक्तायां विशिष्टप्रार्थनायामंशभेदज्ञापनाय विभज्य प्रार्थ्यत इति नाधिक्यम् । यद्वा, उत्तरवाक्ये केवलं वाक्यान्वयार्थं प्रार्थनापदमध्याह्रियते; तत्तु फलविशेषपरमिति न पौनरुक्त्यम् । * अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः

कृतकृत्यो भविष्यति ॥ * इति निक्षेपस्य द्वयमन्त्रकत्वं प्रमाणसिद्धम् । एवं षडङ्गन्यासस्य द्वयवेद्यत्वात् तद्वेद्यं पुरुषकारत्वं तत्सापेक्षम् । न चाष्टाङ्गयोगवत् षडङ्गस्याप्युपायतया कृपादेस्तत्र निर्विषयत्वात्, पुरुषकारस्य च कृपापारतन्त्र्यानन्यार्हत्वविशिष्टत्वाच्च, कथं कृपादिकार्यपुरुषकारभाव इति वाच्यम् । अन्यत्र भक्तिप्रपत्त्योरुभयोरप्यनुष्ठेयत्वात् । अत्र प्रपत्तिमात्रस्य तत्फलदानं कृपामन्तरेण न सिध्यतीति कृपासाफल्योपपत्तेः । अतः षडङ्गस्थले पुरुषकारत्वसंभवात् तस्य च सहेतुकत्वात् निर्हेतुकस्य तस्यासिद्धिरिति ॥

अत्रोच्यते —

(पुरुषकारमाम्पोदु कृपैयुम् पारतन्त्र्यमुम् अनन्यार्हत्वमुम् वेणुम्)

भक्तिवत् षडङ्गस्य तत्रोपायत्वात्, सकिञ्चने कृपा न प्रवहतीति अनुष्ठितसाधनाधिकार्यङ्गीकारः ईश्वरस्य स्वतस्सिद्ध इति तद्वशीकरणाय पारतन्त्र्यानन्यार्हत्वे, अप्यफले । अतः सकिञ्चनस्थले कृपादिगुणत्रयघटितं घटकत्वमनपेक्षितमिति अकिंचनविषय एव तदुपयोग इत्यर्थः ॥

न च; भक्तिप्रपत्त्युभयानुष्ठानसाध्यं फलं प्रपत्तिमात्रस्य देयं चेत् ईश्वरस्य वशीकरणेन भाव्यम् । प्रपत्तेरतिक्षुद्रत्वेनास्याकिञ्चनप्रायत्वाच्च कृपादीनां साफल्यमिति वाच्यम् । अन्यत्र प्रपत्तेः भक्तिफलकत्वात् । भक्तेश्च मोक्षफलकत्वाच्च । फलस्योभयसाध्यत्वाभावात् । फलान्तरसाधकप्रपत्तौ अन्यत्रोभयानुष्ठानाभावेन फलान्तरार्थप्रपत्तौ घटकानपेक्षणापाताच्च । न च मुख्यसाधनफलस्य मुख्यसाधनं प्रति देयत्वे घटकेन दातृवशीकरणमपेक्षितम् । मुख्यसाधनरहितस्याकिंचनप्रायत्वात् दयनीयत्वमपि विद्यत इति वाच्यम् । अमुख्यसाधनस्यापि मुख्यसाधनतुल्यफलप्रदत्वसंकल्पस्यानादितया, सत्यसंकल्पेश्वरस्य फलप्रदाने घटकानपेक्षणात् । यदि, फलविसदृशत्वात् घटकापेक्षा; तर्हि, भक्तिस्थलेऽपि घटकत्वप्रसंगः । किंच, यद्यमुख्यसाधने घटकापेक्षा, तदा अश्वमेधावभृथस्नानस्य द्वादशवार्षिकफलप्रदत्वेऽपि पुरुषकारापेक्षापत्तिः । अपि च भक्तितुल्यप्रायश्चित्तेन प्रपदनेन सर्वकर्मक्षये निर्णिमित्तत्वेन भगवत्कालुष्याभावात् पुरुषकारेण तच्छामनमनपेक्षितम्, चेतनस्य निर्दुःखत्वात् । दुःखासहिष्णुत्वलक्षणकृपानुदयश्च । अत एवोक्तम् * मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ * इति ॥

न च भरसमर्पणात्पूर्वं तत्करणे भगवदभिमतिसिध्यर्थं पुरुषकारापेक्षा वर्तते; पूर्वं कालुष्यहेतुपापसत्त्वादिति वाच्यम् । साधनविधेरेव तदभिमतिरूपतया तदा तस्याः ज्ञातत्वाच्च न तदा घटकापेक्षा । किंच अष्टाङ्गयोगवत् षडङ्गेऽपि योग्यतामात्रं पूर्वं प्रतिपाद्यम् । अन्यथा भक्त्यारम्भेऽपि घटकापेक्षापत्तेः । इत्यङ्गमुदितमित्यात्मज्ञानं षडङ्गे योग्यतासंपादकप्रायश्चित्तत्वेन पूर्वाङ्गतया विहितम् । अतः मुख्यगौणविभागानादरेण प्रतिपदविहितसर्वोपायान्तराभावस्थले घटकापेक्षेति गौणसाधनषडङ्गस्थले न तदपेक्षा ॥

यदि, "न हि वचनविरोधे न्यायः प्रभवति" इति षडङ्गस्य मन्त्रप्रतिपाद्यत्वात् तत्र पुरुषकारापेक्षेति मन्यसे तदेव नास्ति । तथा हि, * प्रपद्ये * इति क्रियापदस्य * प्रार्थनामतिश्शरणागतिः – याच्ञाप्रपत्तिश्शरणागतिः * इति लक्षणानुरोधेन प्रार्थनापर्यवसानात्, भरसमर्पणस्य केवलाध्यवसायरूपत्वाच्च, नोपायप्रार्थनाभर-

समर्पणम् । न च भरसमर्पणस्य गोप्तृत्ववरणगर्भत्वात् तदुपपत्तिः * उपायार्थैकवाचकः इति तदर्थकत्वनिषेधात् । न च, * इदं शरणमज्ञानाम् * इत्यत्र शरणशब्दस्यार्थोऽनेन निष्कृष्यते । मन्त्रप्रकरणगतस्य तदयोगात् । इदंशब्दनिर्दिष्टशरणागतिविषयतया प्रयुक्तशरणशब्दस्य गोप्तृवाचकत्वशङ्कायाः गृहवाचकत्वशङ्कायाश्च चेतनाचेतनविभागानभिज्ञेऽनुदयात् ॥

न च गोप्तृरेवोपायान्तरस्थाननिवेशितत्वात् तस्योपायान्तरनैरपेक्ष्यमभिप्रेत्य, गोप्तर्येवायमुपायत्वनिर्देशः । एतदभिप्रायेण * उपायार्थैकवाचकः * इति निष्कर्षश्चेति वाच्यम् । अत्र शरणशब्दप्रवृत्तिनिमित्तमुपायत्वं गोप्तृत्वमात्रम्, उतोपायान्तरस्थाननिवेशितत्वमात्रम्, उतोपायान्तरस्थाननिवेशितत्वे सति गोप्तृत्वं वा । नाद्यः, * प्रपद्ये * इत्यत्र गोप्तृत्वाभावेन प्रार्थनापर्यवसानानुपपत्तेः । न द्वितीयः । उपायान्तरस्थाने प्रपत्तेर्निवेशितत्वेन भगवतस्तथात्वासिद्धेः ॥

ननु, निरपेक्षत्वमुपायान्तरस्थाननिवेशितत्वम्, ततश्च निरपेक्षरक्षकत्वमेवोपायत्वम्; भगवति तद्व्यतिरिक्तस्योपायत्वस्य निर्वक्तुमशक्यत्वादिति चेत्, किमिदं निरपेक्षत्वम्, प्रपत्तिनिरपेक्षत्वं वा, भक्तिनिरपेक्षत्वं वा, उभयनिरपेक्षत्वं वा; आद्ये अङ्गत्वेन प्रपत्तिनिरपेक्षत्वम्, अङ्गित्वेन तदनपेक्षत्वं वा; नाद्यः, ज्योतिष्टोमादिस्थले अङ्गत्वेन गोप्तुः प्रपत्त्यनपेक्षणादुपायत्वप्रसङ्गः । न द्वितीयः, अङ्गित्वेन प्रपत्त्यनपेक्षितत्वस्य भक्तिस्थले ज्योतिष्टोमादौ च सत्त्वात्, सर्वत्र उपायत्वापत्तिः; अङ्गित्वेन प्रपत्त्यनपेक्षणात् प्रकृते तदसिद्धिश्च । द्वितीयेऽपि अङ्गत्वेन भक्तिनैरपेक्ष्यमभिमतम्, उताङ्गित्वेन तन्नैरपेक्ष्यं वा; आद्ये भक्तिस्थले ज्योतिष्टोमादिस्थले चापि गोप्तुरुपायत्वापत्तिः । उभयत्रापि भक्तेरङ्गत्वेनापेक्षाविरहात् । न द्वितीयः, विद्यान्तरनैरपेक्ष्यस्य * विकल्पोऽविशिष्टफलत्वात् * इति न्यायप्राप्तत्वेन अङ्गित्वेन भक्त्यनपेक्षत्वलक्षणस्योपायत्वस्यापूर्वत्वेन * उपायार्थैकवाचकः * इति व्युत्पादनीयत्वासिद्धः । प्रकृतोपायव्यतिरिक्तोपायान्तरनैरपेक्ष्यस्य सर्वसाधारणतया तत्रासाधारण्येन वेद्याकारत्वासिद्धेश्च । अङ्गित्वेन भक्त्यनपेक्षत्वस्य ज्योतिष्टोमादिस्थलेऽपि सत्त्वेन तत्रापि गोप्तुरुपायत्वापत्तेश्च । भक्तिनैरपेक्ष्यस्य शरणशब्दार्थत्वे, एकशब्दस्य वा सर्वधर्मादिशब्दस्य वा वैयर्थ्यापत्तेश्च । न तृतीयः । प्रकृते तदसिद्धिप्रसंगात् । यदि, व्यासज्यवृत्त्यभावाभ्युपगमेन प्रकृते तत्सिद्धिः, तदा ज्योतिष्टोमादिस्थलेऽतिव्याप्तिरव्याहता । तस्मात् सिद्धोपायव्यतिरिक्तोपायान्तरस्थाननिवेशितत्वमुपायत्वम् । न तु गोप्तृत्वगर्भम् । न वा नैरपेक्ष्यरूपत्वम् । अतोऽत्र " प्रपद्ये " इत्यस्य याच्ञारूपत्वान्न भरसमर्पणत्वम् ॥

* आत्मात्मीयभरन्यासो ह्यात्मनिक्षेप उच्यते । वाचा नम इति प्रोच्य मनसा वपुषा च यत् ॥ तन्नमः पूर्णमुद्दिष्टमतोन्यन्नूनमुच्यते ॥ * अहमद्यैव मया समर्पितः * इत्यादिषु भरसमर्पणस्य याच्ञारूपत्वाभावोक्तेः शरणशब्दस्य गोप्तृत्वार्थकत्वाभावान्न गोप्तृत्ववरणसिद्धिः । किंच यद्यत्र शरणशब्दोपश्लिष्टक्रियापदेन गोप्तृत्ववरणसिद्धिः, तदा उत्तरवाक्यमनर्थकतामापद्येत । गोप्तृत्ववरणस्यैव फलप्रार्थमात्वात् ॥

न च भरसमर्पणविशिष्टगोप्तृत्वप्रार्थनायाः पूर्वमुक्तत्वात् तत्रांशभेदज्ञापनाय गोप्तृत्ववरणं विभज्य प्रदर्श्यत इति वाच्यम्; विश्वासकार्पण्यविशिष्टतया च भरसमर्पणप्रतीतेः । सर्वेषामपि विभज्य प्रदर्शनापत्तेः । अन्यथा विवेकाकाङ्क्षाया अशान्तत्वापातात् । अत एवोक्तं सारे * एवं शरणशब्दान्विते ' प्रपद्ये ' इति क्रियापदे * रक्षिष्य-

तीति विश्वासो गोप्तृत्ववरणं तथा । आत्मनिक्षेपकार्पण्ये * इत्युक्तचतुष्टयमप्युक्तं भवति * इति । किंच उपदेशवाक्ये चैवं वक्तुं शक्यते अनेन साधनानुष्ठानयोग्ये अनुष्ठानवाक्ये यथामन्त्रं तदर्थानामनुष्ठेयत्वे, तात्पर्यात् गोप्तृत्ववरणस्य प्रत्येकमप्यनुष्ठेयत्वं स्यात् ; एतच्च सकृत्त्वविरुद्धम् ॥

यच्चोक्तं फलसामान्यस्य पूर्वं प्रार्थितत्वात् तद्विशेषसमर्पकमुत्तरवाक्यमिति ; तदप्यनुपपन्नम् । प्रार्थनापदवैयर्थ्यापत्तेः । न च, प्रार्थनापदं वाक्यान्वयसिद्धये केवलमध्याहृतम्, तन्निरर्थकमेवेति वाच्यम् । निरर्थकस्याकाङ्क्षाविरहेणान्वयघटकत्वानुपपत्तेः । सार्थकं तत्र वाक्यतात्पर्यं नास्तीति चेत् अस्यानुष्ठानवाक्यत्वेन एकदेशे तात्पर्याभावकल्पनायोगात् । किंच प्रयुक्तपदावैयर्थ्याय उद्देश्यांश एवास्यान्वयो वाच्यः ; तथोद्देश्योपादेयभावेन अत्र योजना दुर्घटा । फलविशेषोपस्थापकोत्तरवाक्यस्य प्रार्थनापर्यवसायिना "प्रपद्ये" इति पदेनान्वयदौर्घट्यं च । यद्युत्तरवाक्यस्य केवलं फलविशेषोपस्थापकत्वेन मन्त्रस्यैकवाक्यत्वम्, तदा श्रुतिस्मृत्यादिप्रसिद्धद्वयत्वमेव हीयेत । ततश्चोक्तयोजना बहुप्रमाणविरुद्धा ॥

ननु, समर्पणस्यानेकांशत्वात् भरसमर्पणं पूर्ववाक्ये, फलसमर्पणमुत्तरवाक्ये इति न वैयर्थ्यमिति चेत् ; न, अनेकांशविशिष्टांशत्रयात्मकसमर्पणस्य एकज्ञानत्वभङ्गप्रसंगात् । आत्मसमर्पणस्यापि पृथगनुष्ठानाय वाक्यान्तरमपि प्रसज्यते । ननु, पूर्ववाक्ये समर्पणमुत्तरवाक्ये गोप्तृत्ववरणं च प्रतिपाद्यत इति चेत् ; तदा न्यासस्य विशिष्टैकज्ञानात्मकत्वं भज्येत । धानुष्कानेकव्यापारविशिष्टेषुप्रयोगवत्, आनुकूल्यसंकल्पादिविशिष्टैकज्ञानत्वं हि समर्पणस्योच्यते । किंचास्मिन्पक्षे निरपेक्षरक्षकत्वमुपायत्वमित्युक्तप्रतिज्ञाहानिः । अन्वयस्य दुर्वचनत्वं च । किंच "प्रपद्ये" इत्यस्य याञ्चापर्यवसानासिद्धिश्च ॥

न चेष्टापत्तिः "उपायतायाञ्चाप्रपत्तिः" इत्यादिविरोधात् । यदि पूर्ववाक्ये गोप्तृत्ववरणं, उत्तरवाक्ये भरसमर्पणं च प्रतिपाद्यते ; तदा, * उपायार्थैकवाचकः * इति वचनविरोधः । यदि, एतद्रीत्या रक्षकत्वमात्रं नोपायत्वम्, निरपेक्षत्वविशेषितं तदिष्यते तर्हि उत्तरवाक्यवैयर्थ्यम् । समर्पणस्य तत्रैव सिद्धेः । एवं षडङ्गस्य द्वयप्रतिपाद्यत्वे अनेकप्रमाणोपपत्तिविरोधात् न तस्य तत्प्रतिपाद्यता ॥

न च, * अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् * इति वचनबलादुक्तास्वारस्यं सह्यमिति वाच्यम् ; * गृह्णीयान्मन्त्रराजानं मां गच्छेच्छरणं नरः * इति एतत्पूर्ववाक्ये शरणागतिविधानेन तन्निष्ठानुष्ठेयफलसमर्पणे तात्पर्यादस्य वाक्यस्य ; अन्यथा भरसमर्पणस्य द्विरावृत्तिप्रसंगः । ततश्च मन्त्रस्यैकवाक्यत्वेन योजनायामिदं न घटते ; न च भिन्नवाक्यत्वेन गोप्तृत्ववरणस्य पूर्ववाक्यस्थत्वात् तदभिप्रायेणेदं वचनम् * मां गच्छेच्छरणं नरः * इति गोप्तृत्ववरणमेवोच्यत इति वाच्यम् * उपायार्थैकवाचकः * इति विरोधात् । समर्पणस्य विशिष्टैकज्ञानत्वविरोधात् । मन्त्रमात्रस्य गोप्तृत्ववरणे भरसमर्पणे च विनियोगविरोधाच्च । एकैकवाक्यस्य तदुभयमन्त्रत्वात् । ततश्च मन्त्रस्यैकवाक्यत्वे विनियोगवचनानुगुण्येन द्विरावृत्त्यापत्तिः । वाक्यद्वयत्वे मन्त्रमात्रस्य उभयत्र विनियोगानुपपत्तिरिति नेदं वचनं षडङ्गे द्वयविनियोजकम् । तर्हि षडङ्गमन्त्रः क इति चेत् ; मूलमन्त्र इति ब्रूमः । तदर्थत्वेन षडङ्गस्य मुनिभिः व्याख्यातत्वात् ॥

अहिर्बुध्न्यसंहितायां नमश्शब्दार्थत्वेन साङ्गभरसमर्पणमुक्तम् । * नमस्कारात्मकं यस्मै विधायात्म-

निवेदनम् । समित्साधनकादीनां यज्ञानां न्यासमात्मनः ॥ नमसा योऽ करोद्देवे स्वध्वार इतीरितः । न्यासिनो न्यास एव स्यान्निष्ठा तत्पूर्विकाः क्रियाः । व्यापकैर्नैष्ठिकैर्वान्यैः कुर्यात्तेऽ प्यर्पणे मताः ॥ * इत्यादिष्वपि मूलमन्त्राङ्गकत्वं सिद्धम् । न्यासविशेषस्य प्रणवमन्त्रकत्वमपि क्वचिदुक्तम् । * हविर्गृहीत्वात्मरूपं वसुरण्येति मन्त्रतः । जुहुयात्प्रणवेनाग्नौ अच्युताख्ये सनातने ॥ * वेदे च * ओमित्यात्मानं युञ्जीत * इति । एवं षडङ्गस्य द्वयमन्त्रकत्वे अनेकप्रमाणोपपत्तिविरोधात्, मूलमन्त्रकत्वे प्रमाणसत्त्वाच्च न षडङ्गयोगो द्वयमन्त्रकः ।

एवं द्वयमन्त्रत्वाभावात् द्वयप्रकाश्यत्वाभावाच्च न षडङ्गयोगे पुरुषकारसंभवः । * जीवात्मानं हविः कृत्वा तच्छरीरं महीयसि । ब्रह्माग्नौ जुहुयादोमित्यनेन द्वयरूपिणा ॥ * इति वरदाचार्यवचनं कथं संगच्छत इति चेत्; स्वगतस्वीकारनिष्ठानां षडङ्गे अश्रद्धा मा भूदिति तेषामपि द्वयाधिकारित्वाभिमानसिद्धत्वात्तस्य ॥

अयमत्र संग्रहः ;

षडङ्गघटकत्वं च मन्त्रबोध्यं यतस्ततः । घटकत्वं सहेतु स्यादिति चेत्तन्न युज्यते ॥
साधनान्तरसद्भावे कृपाद्यनवकाशतः । विरुद्धमुभयं भक्तिप्रपत्ती शेषशेषिणौ ॥
गौणमुख्यसमं नो चेत्सर्वत्र घटकं भवेत् । न्यासस्सर्वाघहारी स्यात् विधिना नियतश्च सः ॥
न विधिर्घटके यस्मान्न मन्त्रे न्यासबोधनम् । अतश्शरणशब्दोऽ प्युपायार्थैकवाचकः ॥
नैरपेक्ष्यमभिप्रेत्य गोप्ता नोपाय उच्यते । प्रपत्त्यपेक्षणाद्भक्तिर्नैरपेक्ष्यं यदीष्यते ॥
स्वर्गप्रदोऽ प्युपायस्स्यान्न्यासाप्तौ न विधिर्यतः । एकशब्दादिवैयर्थ्यं तद्वेद्यत्वं च नो भवेत् ॥
गोप्ता शरणशब्दार्थो यदि स्याद्व्यर्थता तदा । उत्तरस्य च वाक्यस्य वरणार्पणयोर्यदि ॥
विविच्य कथनं तत्र मतं तत्तु न सिध्यति । किंचोपदेशो यद्येतत् तदैवं स्यान्न चास्ति तत् ॥
अनुष्ठानपरत्वस्य भङ्गाद्यदि तदिष्यते । तदा सकृत्त्वं भज्येत वरणार्पणयोस्तथा ॥
विशिष्य च फलस्योक्तौ प्रार्थना विफला भवेत् । नातः परमनुष्ठानवाक्ये द्वित्वा द्वयस्य च ॥
दौर्घस्यमन्वये किंच द्वयत्वं भज्यते तदा । यदि वाक्यद्वयेप्युक्ते क्रमाद्भरफलार्पणे ॥
विश्वासादि च वक्तव्यं पृथग्वाक्यद्वये क्रमात् । वरणस्यार्पणस्यापि अनुष्ठानं यदीष्यते ॥
तदैकज्ञानताहानिरुच्येतात्मार्पणं पृथक् । भरार्पणं च वरणं क्रमात्तत्र यदिष्यते ॥
तदा विशिष्टज्ञानत्वं प्रपत्तेर्विहतं भवेत् । नैरपेक्ष्य प्रतिज्ञा च भग्ना सापेक्षता यतः ॥
वरणस्यार्पणस्यापि क्रमादुक्तिर्यदिष्यते । तदा शरणशब्दस्य उपायार्थकता हता ॥
वैयर्थ्यमुत्तरस्य स्यान्नैरपेक्ष्य विशेषणे । शरणागतिनिष्ठस्य पूर्वोक्तस्य फलार्पणे ॥
विनियोगो वृथाध्वद्यं भवेद्भरसमर्पणे । गोप्तृत्ववरणे च प्राक् उपायार्थकता हता ॥
विशिष्टैकज्ञानता च द्विवचस्याद्विनियोजनम् । उभयो मन्त्रमात्रत्वं स्मृतिश्चैवं न युज्यते ॥
षडङ्गो मूलमन्त्रार्थः तथा व्याख्यानतः क्वचित् । षडङ्गे प्रणवो मन्त्रः श्रुतिस्मृत्युपपत्तिभिः ॥
श्रद्धार्थं तु स्वतन्त्राणां पूर्विकैर्विनियोजनम् । उभयोः कृत्स्नमन्त्रत्वस्मृतिश्चैव न युज्यते ॥
तस्मात् द्वये षडङ्गस्य गन्धो नैव च दृश्यते । अतः पुरुषकारत्वे हेत्वभावो व्यवस्थितः ॥

इति षडङ्गे पुरुषकाराभावाधिकारः ॥ ७ ॥

॥ ८ ॥ अथ पुरुषकारत्वसमर्थनाधिकारः ॥

(पिराट्टीत्यादि)

पुरुषकारत्वस्याप्रामाणिकत्वात्तस्यैवाभावे, तन्निर्हेतुकत्वासिद्धिरिति शङ्कया संगतिः ॥

संशयस्तु, पुरुषकारनिर्हेतुकत्वं न संभवति, उत संभवतीति । तदर्थं पुरुषकारत्वे प्रमाणं नास्ति, उतास्तीति । तदर्थं श्रीरामायणं पुरुषकारत्वे प्रमाणं न भवति, उत भवतीति । तदर्थं तत्रोक्तं विश्लेषत्रयं पुरुषकारत्वगमकं न भवति, उत भवतीति । तदर्थं तद्गमकत्वे विशेषवचनान्तरसाहाय्यं नास्ति, उतास्तीति । तदर्थं विशेषवचनान्तरं कार्यदशायां ज्ञानशक्त्यादिकार्योपयोगिगुणोद्बोधनपरम्, उताश्रयणोपयोगिवात्सल्याद्युद्बोधनपरमिति ॥

यदा ज्ञानाद्युद्बोधनपरत्वम्; तदा विश्लेषत्रयस्य विशेषवचनान्तरसाहचर्यासाहाय्यासंभवात् पुरुषकारसद्भावनिर्णायकत्वं न संभवतीति प्रमाणासिद्धौ पुरुषकारत्वासिद्धेः तन्निर्हेतुकत्वासिद्धिरिति पूर्वपक्षे फलफलिभावः । यदा विशेषवचनान्तरस्याश्रयणोपयोगिसौशील्याद्युद्बोधनपरत्वम् । तदा विश्लेषत्रयस्य विशेषवचनान्तरसाहाय्यसंभवात् पुरुषकारत्वसद्भावनिर्णायकत्वं संभवतीति प्रमाणसिद्धौ पुरुषकारत्वसिद्धेः तन्निर्हेतुकत्वसिद्धिरिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु, लक्ष्म्याः पुरुषकारत्वमसिद्धम् । प्रमाणाभावात् । न च श्रीरामायणं तत्र प्रमाणम् । * रघुवरचरितं मुनिप्रणीतं * इत्यादिवचनात् । रामायणमिति समाख्यया च भगवत्परत्वेन लक्ष्मीपरत्वाभावात् । भवतु वा तत्परत्वम् । तथाऽपि विश्लेषत्रयस्य पुरुषकारसूचकत्वे प्रमाणं नास्ति, गुणान्तरोपबृंहकत्वेनापि तदुपपत्तेः । ननु, * आकिञ्चन्यैकशरणाः केचिद्भाग्याधिकाः पुनः । मत्पदाम्भोरुहद्वन्द्वं प्रपद्य प्रीतमानसाः ॥ लक्ष्मीं पुरुषकारेण वृतवन्तो वरानने । * मत्प्राप्तिं प्रतिजन्तूनां संसारे पततामधः । लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः । ममापि च मतं ह्येतन्नान्यथा लक्षणं भवेत् । * अहं मत्प्राप्त्युपायो वै साक्षाल्लक्ष्मीपतिः स्वयम् । लक्ष्मीः पुरुषकारेण वल्लभा प्राप्तियोगिनी । एतस्याश्च विशेषोऽयं निगमान्तेषु शब्द्यते । * इति पुरुषकारत्वस्यान्यत्र कण्ठोक्तत्वादुक्तविश्लेषत्रयं तदुपयोगिकृपादिगुणोपबृंहकमिति चेत्; मैवम् । फलप्रदानसमये, मातृत्वप्रयुक्तसंबन्धेनेश्वरस्य फलप्रदत्वौपयिकज्ञानशक्तिसत्यसंकल्पत्वकृतज्ञत्वादिगुणोद्बोधकत्वस्योदाहृतवचनविवक्षितत्वात् । अत एवोच्यते । * जगत्समस्तं यदपाङ्गसंश्रयम * श्रेयो न ह्यरविन्दलोचनमनः कान्ताप्रसादादृते संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् * इत्यादि ॥

अन्यथा, अत्र सर्वत्र समाश्रयणहेतुत्वमेव विवक्षितं चेत् । तत्तत्फलसाधनविधायकसर्वशास्त्रानर्थक्यापत्तिः । अत्र सर्वत्र तत्तत्फलोद्देशेन प्रतिपदविहिततत्तत्साधनानुष्ठानस्यैव समाश्रयणघटकतया पुरुषकारस्यावकाशाभावात् । शक्तानां प्रतिपदविहिततत्तत्साधनानुष्ठानं समाश्रयणसिद्धिहेतुः । अशक्तानां * तेन तेनाप्यते तत्तन्न्यासेनैव * इत्युक्तप्रपत्त्यनुष्ठानलक्षणगौणसाधनानुष्ठानं तत्सिद्धिहेतुः; शक्ताशक्तकोटिद्वयातिरिक्तकोट्यन्तरस्याभावादन्यत्रापि न पुरुषकारावकाशः । अतः पुरुषकारत्वपरवचनानामाश्रयणदशाया-

मनवकाशानां फलप्रदत्वदशायां तदुपयुक्तज्ञानाद्युद्भावकत्वेन तदुपयोगित्वमेव पुरुषकारत्वमिति तदभिप्रायत्वमेवो-चितम् । अतः शृणोति, श्रावयति, श्रीयते, श्रयते इत्यादिश्रीशब्दव्युत्पत्तिसिद्धं घटकत्वमपि कार्यदशायां फलघटकत्वमेव । न तु सापराधविषयभगवत्कालुष्यस्य वात्सल्याद्युद्भावनद्वारा शमनेनाश्रयणघटकत्वम् । विद्यारंभविरोधिभगवत्कालुष्यस्यात्मज्ञानादिप्रायश्चित्तेन नाशितत्वात्, फलप्राप्तिप्रतिबन्धकतत्कालुष्यस्यानुष्ठित-साधनेन नाशितत्वाच्च । अतः फलप्रदानसमयेऽपि कालुष्यशामकत्वेन न फलघटकत्वम् । किंतु तदुपयोगि-ज्ञानशक्त्याद्युद्भावकत्वेन ॥

न चैवं सति वात्सल्यादेरनवकाशता उत्तराघविषयत्वात्तेषाम् । न च सत्यसंकल्पत्वादनुष्ठितसाधना-धिकारिविषये स्वत एव फलप्रदत्वौपयिकज्ञानाद्युद्बोधकत्वं संभवतीति किं घटककृत्येनेति वाच्यम् । भगवद्गुणानां स्वतस्सिद्धत्वेऽप्येतदायत्तत्वस्यापि शास्त्रसिद्धत्वात् * श्रद्धया देवो देवत्वमश्नुते * अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा * स्वतश्श्रीस्त्वं विष्णोस्त्वमसि तत एवैष भगवान् * इत्यादिकं हि श्रूयते । एवं फलघटकत्वव्यति-रेकेण वात्सल्याद्युद्बोधकत्वेन समाश्रयणघटकत्वस्याप्रामाणिकतया तन्निर्हेतुकत्वस्य सुतरामसिद्धिरिति ॥

अत्रोच्यते :

(पिराट्टियित्यादि)

अस्यायमर्थः; श्रीरामायणं पुरुषकारत्वे प्रमाणम्; न च तस्य भगवत्परत्वम् * काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् * इति सीतापरत्वावगमात् । न च, * रघुवरचरितं * इत्यादिविरोधः । अत्र कृत्स्नमिति विशेषितत्वेनान्यस्याप्रधानतया प्रतिपाद्यत्वेऽप्युपपत्तेः । सीता-चरितं च रामविश्लेषरूपम् तत्संश्लेषरूपं च । तत्रापि विश्लेष एव प्रधानप्रतिपाद्यः । काव्यसंग्रहे * मा निषाद * इति श्लोके क्रौञ्चविश्लेषस्य तात्पर्यविषयत्वात् । तथात्वं च * शोकः श्लोकत्वमागतः * इत्युक्तेः । अतः सीताविश्लेषस्य प्रधानप्रतिपाद्यत्वात्; इतिहासानां वेदान्तोपबृंहणत्वनियमाच्च । विश्लेष-प्रतिपादकेन श्रीरामायणेन कृपापारतन्त्र्यानन्यार्हत्वानि पुरुषकारोपयुक्तानि प्रतिपादितानीति श्रीशब्दोक्तं पुरुष-कारत्वं श्रीरामायणे उपबृंहितमिति तत्र शृणोति, श्रावयतीति व्युत्पत्त्या * आश्रयस्वैनमच्युतम् * इत्यादि गुरुप्रभृतिवचनं श्रुत्वा तस्य भगवन्तं प्रति श्रावयितृत्वमुच्यते । * मित्रभावे न संप्राप्तं न त्यजेयं कथञ्चन * इति भगवतः श्रुत्वा * मित्रमौपयिकं कर्तुम् * इत्यादीन् चेतनं प्रति श्रावयितृत्वं वा; * आनृशंस्यं परो धर्मः * इत्यादि भगवतः श्रुत्वा * प्राणैरपि त्वया नित्यं संरक्ष्यश्शरणागतः * इति कपोतिकावत् * किमेतन्निर्दोषः क इह * न कश्चिन्नापराध्यति * कः कुप्येद्वानरोत्तम * इत्यादि श्रावयितृत्वं वा उच्यते । श्रीयते श्रयत इति व्युत्पत्त्या स्वाश्रितसंरक्षणार्थं स्ववाल्लभ्येन वशीकरणमुच्यते । * लक्ष्मीं पुरुषकारेण वृतवन्तः * लक्ष्मीः पुरुष-कारत्वे निर्दिष्टा परमर्षिभिः * लक्ष्मीः पुरुषकारेण वल्लभा प्राप्तियोगिनी * इत्यादि स्मृतिश्चात्र प्रमाणम् । न चैतेषां सर्वेषां कार्यकाले फलप्रदानशक्त्याद्युद्भावकत्वेनान्यथासिद्धिः । तत्रापि उक्तप्रकारेण विशेषणामवश्यंभावा-दिति वाच्यम् । अत्र * लक्ष्मीं पुरुषकारेण वृतवन्तो वरानने । मत्क्षमां प्राप्य सेनेश प्राप्यं प्रापकमेव माम् । मत्प्राप्तिं प्रतिजन्तूनां संसारे पततामधः । * आकिञ्चन्यैकशरणाः * पापानां वा * कः कुप्येत् * किमेतन्निर्दोषः

क इह * इति, भक्तिषडङ्गयोगलक्षणोपायद्वयविरहेणात्यन्ताकिञ्चनानां अत एव संसारे पततां पापानां भगवत्कालुष्यशामकत्वेन घटकत्वं हि प्रतीयते । इदं च प्रयोजनघटकत्वे न संभवति । तदानीं चेतनस्य सकिंचनत्वादनुष्ठितसाधनत्वेन निष्पातत्वात् । तदभावेन कालुष्यासिध्या उचितैरुपायैर्विस्मार्येति क्षामणानुपपत्तेश्च । विशेषवचनं च श्रूयते । * स्वाचार्यं हृदये ध्यात्वा जप्त्वा गुरुपरंपराम् । ततस्संप्रार्थयेद्देवीं सर्वलोकेश्वरप्रियाम् । माता त्वं सर्वलोकानां सर्वलोकेश्वरप्रिये । आश्रयस्वेश्वरमिममपराधशतैर्युतम् ॥ इति देवीं पुरस्कृत्य पश्चाद्देवं समाश्रयेत् । * इति पराशरः । वरदाचार्यैश्चोक्तम् * अपराधैकसक्तानामनर्हाणां चिरं नृणाम् । भर्तुराश्रयणे पूर्वं स्वयं पुरुषकारताम् ॥ वाल्लभ्येनानुतिष्ठन्तीं वात्सल्याद्युपबृंहिणीम् । * इति एवं पुरुषकारत्वसामान्यवचनानां समाश्रयणकण्ठोक्तिमद्विशेषवचने सामान्यविशेषन्यायेन पर्यवसानाच्च, समाश्रयणघटकत्वसिद्धिः । न च शक्ताशक्तयोर्मुख्यगौणसाधनाधिकृतत्वात् तृतीयकोट्यभावाच्च पुरुषकारानवकाशः । अष्टाङ्गयोगषडङ्गयोगयोस्स्वयत्नरूपत्वेन स्वरूपविरुद्धत्वज्ञानवतामत्यन्ताकिञ्चनानामपराधानामालयानामन्येषामपि सत्त्वेन तद्विषये समाश्रयणघटकत्वोपपत्तेः । उक्ताधिकारिविशेषसद्भावश्चोत्तरत्र वक्ष्यते । यत्रापि * यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलम् * श्रेयो न ह्यरविन्दलोचनमनः कान्ता * इत्यादिषु मुख्यगौणतत्तत्फलसाधनविषयेषु फलप्रदत्वौपयिकज्ञानशक्त्यादि उद्बोधकत्वमुच्यते । तदपि न पुरुषकारत्वम्; किंतु * लक्ष्म्या सह * इत्याद्युक्तरक्षकत्वमात्रम् । पुरुषकारत्वं तु अत्यन्ताकिञ्चनविषये समाश्रयणघटकत्वम् । तस्मादुक्तलक्षणपुरुषकारत्वस्य प्रमाणान्तरसिद्धत्वात्' तत्साहित्येन विश्लेषत्रयपरं श्रीरामायणं पुरुषकारत्वे प्रमाणमिति तन्निर्हेतुकत्वसिद्धिरिति ॥

संग्रहस्तु;

संशायकत्वाद्विश्लेषत्रयस्य वचनस्य च । अन्यत्र सावकाशत्वाद्घटकत्वममानकम् ॥
इति चेत्तन्न वचने विशेषप्रतिपत्तितः । तच्च रामायणं चापि घटकत्वस्य साधकम् ॥

इति पुरुषकारत्वसमर्थनाधिकारः ॥ ८ ॥

॥ ९ ॥ अथ देव्या उपायत्वशोधनाधिकारः ॥

संश्लेषविश्लेषंगळिरण्डिलुम् पुरुषकारत्वं तात्तुम्

पुरुषकारत्वपरवचनानामष्टाङ्गषडङ्गयोगाभावरूपात्यन्ताकिञ्चनविषयत्वं समर्थितम् । लक्ष्म्या उपायत्वपरवचनानामपि तद्विषयत्वं समर्थ्यत इति सङ्गतिः ॥

संशयस्तु; पुरुषकारनिर्हेतुकत्वं न संभवति, उत संभवतीति । तदर्थं पुरुषकारत्वं नास्ति, उतास्तीति । तदर्थं पुरुषकारत्वपरवचनानां तदुपायत्वपरवचनैर्विरोधोऽस्ति, उत नास्तीति । तदर्थमुपायत्वपरवचनानि भगवत्तुल्योपायत्वपराणि, उत भक्तितुल्योपायत्वपराणि इति । यदा भगवत्तुल्योपायत्वपराणि; तदा तद्वचनानि पुरुषकारत्ववचनविरुद्धानीति तद्विरोधेन पुरुषकारत्वासिध्या तन्निर्हेतुकत्वासिद्धिरिति पूर्वपक्षे फलफलिभावः । यदा, उपायत्ववचनानि भक्तितुल्योपायत्वपराणि; तदा, तेषां पुरुषकारवचनविरोधाभावात्तत्सिध्या तन्निर्हेतुकत्वसिद्धिरिति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु, श्रीरामायणभगवच्छास्त्रादिवचनैः पुरुषकारत्वसिद्धिरिति यदुक्तम्, तन्नोपपद्यते; लक्ष्म्या उपायत्वस्यानेकप्रमाणसिद्धतया तद्विरोधेन पुरुषकारत्ववचनानामतत्परत्वात् । तथा हि; श्रीशब्दे * शॄ हिंसायां * * शॄ विस्तारे * इति व्युत्पत्तिद्वयेन * शृणाति निखिलान्दोषान् श्रृणाति च गुणैर्जगत् । * इत्युपबृंहणोपबृंहितेन अनिष्टनिवर्तकत्वमिष्टप्रापणं च प्रतिपादितम् । एतदेव ह्युपायत्वं नाम । स्मृतिश्च * अलमेषा परित्रातुं राक्षस्यो महतो भयात् * अलमेषा परित्रातुं राघवाद्राक्षसीगणम् * आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी * संसारार्णवतारिणी * वाचः परं प्रार्थयिता प्रपद्येन्नियतः श्रियम् * यामालम्ब्य सुखेनेमं दुस्तरं त्रिगुणोदधिम् । निरन्तरन्त्यचिरेणैव व्यक्तध्यानपरायणाः ॥ * इति । न चानन्योपायत्वविरोधः; लक्ष्म्या उपायत्वेऽप्यनन्योपेयत्वविरोधाभाववदुपपत्तेः । न च * मामेकं शरणं व्रज * इत्येकत्वावधारणविरोधः । गुणविग्रहवैशिष्ट्येऽपि तदैक्यवत् नित्यसंश्लिष्टविशेषलक्ष्मीकत्वेऽपि तदुपपत्तेः । यागादिषु पतिप्राधान्येनैकत्वव्यवहारवत् विशेष्यप्राधान्येन तदुपपत्तेश्च । न चेदमुपायत्वं फलप्रदत्वदशायां तदुपयोगिज्ञानाद्युद्बोधकत्वमात्रम् । * आत्मात्मीयभरं सर्वं निक्षिप्य श्रीपतेः पदे * स्वाम्युपाय उपेयश्च स्वरूपादिसमर्पणे । प्रथितः प्रतिसंबन्धी श्रीमान् निगमचक्षुषा ॥ * * उभयाधिष्ठानं चैकं शेषित्वम् * इति । आत्महविः प्रतिसंबन्धित्वमाग्नावैष्णवादिष्विवात्र शेषित्वं मिथुनस्येति प्रसिद्धम् । * आत्मेति तूपगच्छन्ति * स्वाभाविकोऽस्य संबन्धः पुंसो यः परमात्मना । तस्यैव बोधो न्यासाख्यः प्रथमं यात्युपायताम् ॥ * इत्यादिषु सामान्यतो मोक्षसाधनज्ञानमात्रस्य शेषत्वानुसंधानरूपत्वम्, न्यासस्य च विशेषतः तथात्वं चावगतम्; ततः प्रपत्तेः शेषत्वानुसंधानरूपत्वात्, शेषत्वस्य मिथुनप्रतियोगिकत्वाच्च, मिथुनस्याभिगम्यत्वेनात्महविः प्रतिसंबन्धित्वम् । तत्स्वीकर्तृत्वं तत्फलभूतेष्टप्रापकत्वमनिष्टनिवर्तकत्वं च भगवतस्तुल्यमेवाभ्युपगन्तव्यम् । एवं लक्ष्म्याः भगवत्तुल्योपायत्वस्य विशेषप्रमाणसिद्धतया भरस्वीकाररक्षासंकल्पाश्रयत्वं वक्तव्यम् । संकल्पश्च, * क्षमिष्यामि क्षान्तम् * इत्येवं रूपः । स च पूर्वं लक्ष्म्याः कालुष्यं विना न संभवतीति ईश्वरवदेव कालुष्यं तावत्सिद्धम् । अत एव * स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थितीस्स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन् हरिः । यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलम् * इत्यत्र दुर्गतिप्रदानेऽपि लक्ष्म्याः कर्तृत्वं श्रूयते । ततश्चानाद्याज्ञातिलङ्घनेन क्रुद्धायाः भरसमर्पणपूर्वभाविसमाश्रयणघटकत्वं न सिध्यति । अन्यथाऽन्योन्याश्रयात् । प्रथमं भरसमर्पणेन कालुष्यनिवृत्तिः । तन्निवृत्तौ घटकत्वस्य सिध्या भरसमर्पणसिद्धिरिति । अतः लक्ष्म्याः स्वयं कलुषतया विमुखेश्वरवशीकरणम्, विमुखचेतनवशीकरणं चासंगतमिति घटकत्वमनुपपन्नम् । अतः उपायत्ववचनैः पुरुषकारवचनानां बाधात् न तन्निर्हेतुकत्वसिद्धिः । न च पुरुषकारवचनैरेवोपायत्ववचनानां बाधः किं न स्यादिति वाच्यम् । सावकाशनिरवकाशयोः "निरवकाशं बलीयः" इत्युपायत्ववचनानां निरवकाशत्वात्; पुरुषकारत्ववचनानां समाश्रयणोत्तरकालीनफलप्रदानसमये तदपेक्षितगुणोद्बोधकत्वविवक्षया सावकाशत्वात् । समाश्रयणघटकत्वपरस्य किंचिद्विशेषवचनस्य भूयसां न्यायेन बाधितत्वसंभवाच्च । तस्मात्पुरुषकारत्वस्य तदुपायत्ववचनबाधिततया तन्निर्हेतुकत्वासिद्धिरिति ॥

अत्रोच्यते :

(संश्लेषविश्लेषङ्गळिरण्डिलुम् पुरुषकारत्वं तोत्तुम्)

संश्लेषविश्लेषयोरुभयोरपि पुरुषकारत्वस्यैव सिद्धेः, दशान्तराभावाच्च, पुरुषकारत्वमेव देव्यास्स्वरूपम्,

नोपायत्वमित्यर्थः । अयं भावः ; यद्यप्युपायत्ववचनानां भगवत्तुल्योपायत्वपरत्वे पुरुषकारत्ववचनानां विरोधोऽस्ति ; तथाऽपि भगवत्तुल्योपायत्वं तद्वचनेषु न विवक्षितम् । किंतु, साध्योपायतुल्योपायत्वम् ; साध्योपायरहितस्थले अत्यन्ताकिञ्चनविषये लक्ष्म्याः स्थितत्वमेव तस्या उपायत्वम् । इदं चोपायत्वं नोपासकविषयम्, उपासनस्यैव तत्स्थानप्रवृत्तेः । नापि न्यासविषयम्, न्यासस्य तथात्वात् ; यथा भगवतस्सिद्धोपायत्वं साध्योपायद्वयरहित-विषयम्, तथा लक्ष्म्या अप्युदाहृतप्रमाणसिद्धमुपायत्वमपि तदुभयरहितविषयम् । भगवदुपायत्वं चेतनबुध्या साध्योपायस्थाने निवेशितत्वम् । लक्ष्म्यास्तथात्वं स्वयमेव तत्स्थाननिविष्टत्वमिति वैषम्यम् । ततश्च भगवदुपायत्वं विद्यावेद्याकारः । न तथा श्रिय उपायत्वमित्युक्तं भवति । एवं चोपायान्तरस्थाननिविष्टत्व-मुपायत्वम्, अन्यस्य दुर्वचत्वात् ॥

न चोभयोरपि तत्स्थाननिविष्टत्वे प्रयोजनाभावः, लक्ष्म्याः भक्तिवदुपायान्तरस्थाने स्थित्वा, फलप्रदत्वौ-पयिकप्रसादजनकत्वात् । न चैवं सति भगवदुपायत्वासिद्धिः । अन्यत्रेव फलप्रदत्वमात्रं स्यादिति वाच्यम् ; भगवदुपायत्वस्य साध्योपायान्तरनिरपेक्षत्वेऽपि उपायभावे पुरुषकारसंबन्धसापेक्षताऽवश्यं वर्तते, तत्संबन्धस्या-चार्यसंबन्धत्वात् । आचार्यसंबन्धः पुरुषकारसंबन्धश्च नार्थान्तरम् । किं त्वेकमेव । अतः कार्यदशायां भगवत उपायकृत्ये स्वत एव प्रवृत्तत्वेऽपि पुरुषकारभूतलक्ष्मीसंबन्धप्रतिसन्धानं प्रवृत्त्यौत्कस्यजनकत्वेनोत्तम्भकं भवति । यथा, परिणतभक्तिं दृष्ट्वा प्रसन्नो भवति भगवान् ; तथा पूर्वं पुरुषकारभूतलक्ष्मीमवलोक्य प्रीतः तन्मुखोल्लाससिध्यर्थं तदाश्रितानां कार्यं करोति । तदेवोच्यते * सोऽपि देव्या दासस्तवेति वरदास्मि तवेक्ष-णीयः * इति । * गुरुरेव परं ब्रह्म गुरुरेव परा गतिः * इत्यादिषूक्तं गुरूपायत्वं उदाहृतवचनेषूक्तं पुरुषकारो-पायत्वं चाभिन्नम् ; एवं उपायत्वपरवचनानां भक्त्यादितुल्योपायत्वपरत्वात्, ईश्वरतुल्योपायत्वतात्पर्याभावाच्च, पुरुषकारत्वविरोधाभावात् पूर्वाधिकारस्थापितं पुरुषकारत्वं सुस्थितम् ॥

न च * आत्मात्मीयभरं सर्वं निक्षिप्य श्रीपतेः पदे * इत्यादिप्रमाणैः श्रियोऽपि भरसमर्पणप्रतिसंबन्धि-त्वम्, भरस्वीकर्तृत्वम्, विष्णोरिव फलप्रदत्वं च अवगतमित्युपायत्वसामान्यवचनानामुक्तविशेषपर्यवसानं युक्त-मिति वाच्यम् * उपाये गृहरक्षित्रोः * इति रक्षकत्वोपायत्वयोः परस्परमर्थान्तरत्वेन सामान्यविशेषभावापन्नत्वा-भावात्, रक्षकत्वं फलप्रदत्वम्, प्रतिपदविहितोपायस्थाननिविष्टत्वमुपायत्वमिति तयोरत्यन्तभेदात् । तत्रापि देव्या रक्षकत्वमपि न भगवत्तुल्यरक्षकत्वं प्रतिपाद्यते । तथात्वे मातृत्वप्रयुक्तसहजवात्सल्यादीनां पत्नीत्वप्रयुक्त-पारतन्त्र्यादीनां च गुणानां नाशापत्तेः । अत एवोच्यते * ......युवत्वादौ तुल्येऽपि * इत्यादि । अतः तत्रापि रक्षकत्वं न पतितुल्यम् । अन्यत्र देवतयोः स्वतन्त्रत्वेन स्वतन्त्ररक्षणेऽपि अत्र विशेषणत्वेन हविरुद्देश्य-त्वाद्विशेष्यतुल्यरक्षकत्वमनुपपन्नम् । किंतु विशेषणत्वानुगुणं तद्रक्षणोपयुक्तं तद्गुणोद्बोधकत्वम् । शेषशेषिणोः शेषशेषीभाववत् तत्कृत्योरपि शेषशेषीभावस्योचितत्वात् । यच्च, दुर्गतिप्रदानेऽपि लक्ष्म्याः प्रयोजयितृत्वमुक्तम् ; तन्न ; तत्र लक्ष्म्यास्स्वपारतन्त्र्यानुगुण्येनानुमन्तृत्वस्योक्तत्वात् । अतः कदाचिदपि लक्ष्म्याः कालुष्यगन्धाभावात् तदुपायत्वं न भगवत्तुल्यफलप्रदत्वम् । न वा भगवत्तुल्योपायत्वमिति तदुपायत्वपरवचनानां न समाश्रयणघटक-त्वविरोधित्वमिति ॥

संग्रहः ;

उपायत्वश्रुतेर्लक्ष्म्यास्तस्य कालुष्यभाविनः । तत्सूचकत्वात्कालुष्ये घटकत्वं न सिध्यति ॥
इति चेन्नात्र कथितमुपायत्वं हरेस्समम् । साध्योपायसमं तत्तु गुरूपायत्वमेव च ॥
संबन्धं वीक्ष्य देव्या नो यतो रक्षति माधवः । तस्मात्तदप्रतिभटे घटकत्वे न हि क्षतिः ॥

इति देव्या उपायत्वशोधनाधिकारः ॥९॥

॥१०॥ अथ लक्ष्म्या गौणोपायत्वनिषेधाधिकारः ॥

संश्लेषदशैयिलीश्वरनैत्तिरुत्तुम्

मास्तु भगवत्तुल्योपायत्वं लक्ष्म्याः, स्वपारतन्त्र्यानुगुणं विग्रहगुणसदृशमुपायत्वं तु स्यादिति शङ्कया सङ्गतिः ॥

संशयस्तु, लक्ष्मीघटकत्वस्य निर्हेतुकत्वसिद्धिर्नास्ति, उतास्तीति । तदर्थं, लक्ष्म्याः भगवद्गुणादिसदृशमुपायत्वमस्ति, उत नास्तीति । तदर्थं मन्त्रे लक्ष्म्याः विशेषणत्वम्, उतोपलक्षणत्वमिति । तदर्थं विशेषणत्वे बाधकं नास्ति, उतास्तीति । यदा विशेषणत्वे बाधकं नास्ति; तदा लक्ष्म्याः गुणान्तरवत् विशेषणत्वात्, तत्सदृशमुपायत्वमस्तीति, तदुपायत्ववत् घटकत्वस्यापि सहेतुकत्वमिति पूर्वपक्षे फलफलिभावः । यदा लक्ष्म्याः विशेषणत्वे बाधकमस्ति; तदा तस्याः विशेषणत्वासिद्धेः भगवद्गुणादितुल्यमुपायत्वं नास्तीति तद्दृष्टान्तेन पुरुषकारत्वनिर्हेतुकत्वभङ्गायोगात्, तन्निर्हेतुकत्वसिद्धिरिति राद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु, मन्त्रे मतुप्प्रत्ययेन भगवतः लक्ष्मीवैशिष्ट्यं प्रतिपाद्य, तद्विशिष्टस्य * शरणम् * इत्युपायत्वं प्रतिपाद्यते । न च, अत्र लक्ष्म्या उद्भावितगुणविशिष्टस्यैवोपायत्वात् लक्ष्म्या उपलक्षणत्वमात्रमिति वाच्यम् । उत्तरवाक्येऽपि तस्या उपलक्षणत्वप्रसंगेनोपेयत्वाभावप्रसंगात् । न चेष्टापत्तिः; अपसिद्धान्तात् । यदि मिथुनशेषित्वस्य प्रमाणसिद्धत्वात्, उत्तरवाक्ये श्रियो विशेषणत्वस्य स्वतः प्राप्तस्य बाधकाभावाच्च नोपलक्षणत्वम्, तर्हि तदुपायत्वस्यापि प्रमाणसिद्धत्वात्, तथात्वे बाधकाभावाच्चोपायत्वमपि मिथुननिष्ठम्; अन्यथा, पूर्वोत्तरवाक्ययोः वैरूप्यापत्तिः । न च, पूर्वाधिकारे उपायत्ववचनानां भक्तितुल्योपायत्वपरत्वं स्थापितमिति वाच्यम् । अत्र शरणशब्देन भगवत्तुल्योपायत्वस्योक्तत्वेन तेषामस्मिन्विशेषे पर्यवसानात् । न च, तत्तुल्योपायत्वे मातृत्वप्रयुक्तक्षमावात्सल्यादीनां पत्नीत्वप्रयुक्तपारतन्त्र्यादीनामप्यभावप्रसंग इति वाच्यम् । * मोक्षयिष्यामि * इति भरस्वीकारस्येश्वरनिग्रहरूप * सर्वपापेभ्यो मोक्षयिष्यामि * इत्येवं रूपत्वात् । विधूननश्रुत्यर्थस्य रक्षासंकल्पस्य "भगवन्! तव निग्रहाश्शान्ता भवन्तु" इत्येवं रूपत्वाच्च । स्वीकाररक्षासंकल्पयोः — "क्षमिष्यामि" "क्षान्तम्" इत्येवं रूपत्वे हि विरोधः । ततश्च भरसमर्पणोद्देश्यत्वस्य मातृत्वपत्नीत्वाद्यनुगुणभरस्वीकाररक्षासंकल्पयोश्च संभवेन, पारतन्त्र्यात् गुणादितुल्यम्, स्वीकारसङ्कल्पाश्रयत्वादीश्वरतुल्यं चोपायत्वं सिध्यत्येव ॥

न च भगवदुपायत्वस्य लक्ष्म्युपायत्वसापेक्षत्वे निरपेक्षत्वभङ्ग इति वाच्यम् । पुरुषकारसापेक्षत्वेऽपि तत्साम्यात् । यदि स्वाङ्गसापेक्षत्वम्, न स्वातन्त्र्यभञ्जकम्, तदत्रापि तुल्यम्; अत एवोक्तम् * स्वतः

श्रीस्त्वम् * इति श्लोके ; अन्यथा * अस्या देव्या मनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम् । तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ * इत्याद्यनेकप्रमाणविरोधः । * व्यापकावतिसंश्लेषादेकतत्त्वमिवोदितौ * गाढोपगूढानि ते * इत्यादिनोक्तसुश्लिष्टविशिष्टतत्त्वरूपत्वविरोधः । उपलक्षणत्वेन पृथग्भावे निरूपकत्वभङ्गेन * तेनाकारं श्रियं ज्ञात्वा ज्ञातव्यो भगवान् हरिः * इत्यादिविरोधश्च । लक्ष्म्या उपलक्षणत्वे गुणादीनामपि तथात्वापत्तिः । तेषामुपयोग-सत्त्वात् । विशेषणत्वे तत्तद्वस्त्वनुरूपो ह्युपयोगो वाच्यः । लक्ष्मीस्वरूपोपयोगश्च, * शृणाति निखिलान् दोषान् श्रृणाति च गुणैर्जगत् * इति दर्शितः । अत एव * जगज्जन्मस्थितिध्वंसमहानन्दैकहेतवे * इत्यादिषु प्रतिपन्नमोक्षप्रदत्वस्य भगवल्लक्षणत्वभङ्गाभावश्च । भगवत्सङ्कल्पस्य "क्षान्तम्" इति रूपत्वात् । एत त्सङ्कल्पस्य "क्षमस्व" इति रूपत्वाच्च । तस्मादेकशेषित्वैकाभिप्रायत्वपरस्परप्रावण्यातिशयस्वरूपादिसुश्लिष्टान्वया-द्यविरोधेन विशेषणत्वमेव पूर्ववाक्येऽपि वक्तव्यमिति लक्ष्म्या उपायत्वसिद्धिः । एवं च, उपायभावस्य भर-समर्पणपूर्वकत्वेन सापेक्षत्वात् पुरुषकारभावोऽपि सापेक्षः । एकाधिकारिणं प्रत्येकत्र निरपेक्षत्वम्, अन्यत्र सापेक्षत्वं च विरुद्धम् । श्रियो निरपेक्षत्वं स्वरूपं चेत् सर्वत्र तथात्वमेव । सापेक्षत्वं चेत् तदेव सर्वत्र वाच्यम् । वस्तुनो द्वैरूप्यासंभवात् ; तस्मात् तदुपायभावस्य सापेक्षत्वात् पुरुषकारभावोऽपि सापेक्ष इति । तन्निर्हेतुकत्वासिद्धिरिति । अत एवोक्तं सारे * भरस्वीकाररहितं रक्षासङ्कल्पवर्जितम् । गुणादिकमिहेष्टं हि शरण्यस्य विशेषणम् ॥ ऐकरस्यजुषोश्शेषिदम्पत्योश्शेषकर्मसु । विशेषणविशेष्यत्वं श्रुतं कस्मान्न रोचते ॥ प्रतर्दनादिविद्यासु वेद्येऽपि परमात्मनि । अचेतनवदिच्छामश्चेतनश्च विशेषणम् ॥ इत्थं प्रपत्तिविद्यायां तत्तन्मन्त्रानु-सारतः । विभुः पत्न्या गुणाद्यैश्च विशिष्टो विषयोऽत्र नः ॥ स्वाम्युपाय उपेयश्च स्वरूपादिसमर्पणे । प्रथितः प्रति-संबन्धी श्रीमान्निगमचक्षुषा ॥ * इति ॥

अत्रोच्यते ;

(संश्लेषदशैथिलीश्वरनैत्तिरुत्तम्)

संश्लेषप्रतिपादको मतुप्प्रत्ययः । पुरुषकारत्वविशिष्टश्रीसंबन्धप्रतिपादकः न तूपायत्वविशिष्टश्रीसंबन्ध-प्रतिपादक इत्यर्थः ॥

अयं भावः ; नात्र शरणशब्देन विशेष्य इव विशेषणेऽप्युपायत्वसंबन्धो बोध्यते । तस्य शृणाति श्रृणा-तीति व्युत्पत्त्या श्रीशब्द एव बोधितत्वात् । न हि, प्राप्तेऽर्थे पुनर्विधानसम्भवः । न च श्रीशब्दस्य रूढ्या लक्ष्म्युपस्थापकत्वमात्रम् अवयवार्थ (र्थो) न विवक्षितं इति वाच्यम् । * शृणाति निखिलान्दोषान् * इत्यादिना श्रीशब्दस्यावयवार्थव्युत्पादकशास्त्रवैयर्थ्यात् । तथा वेद्यत्वाय खलु शास्त्रमवयवार्थव्युत्पत्तिं करोति । न च, तदेवात्र शरणशब्देनानूद्यत इति वाच्यम् । यतः एकेनैव शब्देन विशेष्यांशे विधायकत्वम्, विशेषणांशेऽनु-वादकत्वं चाशक्यम् । अनुवादप्रयोजनं च न पश्यामः । न चैवं तेनैवास्मदभिमतसिद्धिश्चेदिष्टापत्तिरिति वाच्यम् । श्रृणातीत्यादिव्युत्पत्त्यवगतोपायत्वं किं सद्वारकमुताद्वारकमित्याकाङ्क्षायां तत्रैव श्रीयते, श्रयते, शृणोति श्रावयतीति व्युत्पत्तिचतुष्टयेन पुरुषकारत्वप्रतीत्या तत्प्रतीतमुपायत्वमर्थसामर्थ्यलिङ्गेन सद्वारकमवगतम् । ततश्च शरणत्वं सद्वारकं रक्षकत्वं चेत् भवदभिमतम् तदोमिति ब्रूमः ॥

ननु, सद्वारकरक्षकत्वस्य तत्र प्रतिपादनेऽप्यत्र शरणशब्देनाद्वारकरक्षकत्वं प्रतिपाद्यत इति चेत्; अत्र किं रक्षकत्वं विधीयत इत्युच्यते; उत रक्षकत्वस्याद्वारकत्वम्; आहोस्वित् विशिष्टम् । नाद्यः, श्रीशब्द एव तद्विधेः । न द्वितीयः, अद्वारकशब्दाभावात् । शरणशब्दस्य विशेष्ये अद्वारकरक्षकत्वविधायकत्वम्, विशेषणे अद्वारकत्वमात्रविधायकत्वं चेति विरम्य व्यापारापत्तेः । सद्वारकत्वस्य श्रीशब्दावगतत्वेन, तद्विरोधेनात्राद्वारकत्वविधानानुपपत्तेश्च । सद्वारकत्वस्योपक्रमावगततया प्राबल्यात् । उक्तदोषादेव न तृतीयोऽपि । किं च लक्ष्म्यास्सद्वारकोपायत्वमद्वारकोपायत्वं च विरुद्धम् । पूर्वमेव द्वारेणान्यथासिद्धत्वाच्च । न ह्येककार्यं प्रत्येकस्यान्यथासिद्धत्वम् अनन्यथासिद्धत्वं च संभवति । व्रीहिद्वारा शेषभूतस्य प्रोक्षणस्य व्रीहितुल्यं यागशेषत्वं हि न संभवति । एवं, श्रीशब्दे पुरुषकाररक्षकत्वस्यावगतत्वात् अप्राप्तं ब्रह्मोपायत्वमेव शरणशब्दो बोधयति । एवं पुरुषकारत्वसद्वारकरक्षकत्वविशिष्टलक्ष्मीवैशिष्ट्यं प्रत्ययेन बोध्यत इति विद्यायां तद्वेद्यत्वसंभवः । अतः न * आकारिणस्तु विज्ञानम् * इत्यादिविरोधः । किंच नीलमुत्पलमितिवदत्र लक्ष्मीसामानाधिकरण्यमुपायत्वस्य शरणशब्देन बोध्यत इति शाखादिवन्न तस्याः बहिर्भावसिद्धिः । बहिर्भूतस्यैवोपलक्षणत्वे जगज्जन्मादेः ब्रह्मलक्षणत्वाभावप्रसंगः । ततश्च सुश्लिष्टैकत्वस्यापि न विरोधः । किं चात्र गुणविग्रहसामानाधिकरण्यमात्रमुपायत्वस्य बोध्यम् । न हि दण्डी गच्छतीत्यत्र गमनक्रियायाः विशेषणविशेष्योभयान्वयवत् शरणशब्दार्थोपायत्वस्य विशेषणेष्वप्यन्वयः; उपायत्वस्य चेतनधर्मस्य अचेतनेष्ववस्थानायोगात् । उत्तरवाक्ये तूपेयत्वस्य विशेषणेष्वप्यन्वयस्संभवति, तस्य चेतनाचेतनसाधारण्यात् । एवम्, लक्ष्मीसामानाधिकरण्यमात्रमुपायत्वस्य बोध्यम् । ततो विधेयांशे च; गुणादिवत् विशेषणत्वेनापि विषयत्वेऽपि न कमपि विरोधं पश्यामः । नाप्युपायत्वाभावे; मोक्षप्रदत्वकर्मणि ऐकरस्यहानिः । पुरुषकारत्वेन तत्रान्वितत्वात् । अन्यथा जगत्कारणत्वादौ गत्यभावप्रसंगात् ॥

किंच, अश्लेषविनाशयोः ईश्वरविषये "क्षमिष्यामि" इत्येवं रूपार्थकत्वम्, लक्ष्मीविषये "क्षमायुक्तं करोमि" इत्यर्थकत्वं च वाच्यम्; तन्न संभवति । विरम्य व्यापारप्रसंगात् । एवं विधूननश्रुतेरपि "क्षान्तम्, क्षमस्व" इत्येवं रूपार्थद्वयबोधकत्वम्, विरम्यव्यापारं विना न संभवति । अतः, भरस्वीकाररक्षासंकल्पायोगात् न भगवत्पारतन्त्र्यानुगुणोपायत्वसिद्धिः ॥

न च, विद्यामात्रस्य * आत्मेति तूपगच्छन्ति * इति शेषत्वज्ञानरूपत्वात् शेषत्वप्रतिसंबन्धित्वं च मिथुनस्येति लक्ष्म्याः भरसमर्पणप्रतिसंबन्धित्वे सिद्धे, तत्स्वीकाररक्षासंकल्पावश्यागताविति वाच्यम्; शरणागतिविद्यायां तादर्थ्यवाचकशब्दाभावेन केवलं भरस्वीकारप्रार्थनेन शेषत्वानुसंधानाभावात् । पश्चाङ्गभरसमर्पणं नात्र प्रतिपाद्यमिति हि द्वितीयाधिकारे उक्तम् । सिद्धान्ते लक्ष्म्याः भक्तितुल्योपायत्वाङ्गीकारे न तस्य शरणशब्दार्थत्वेन वेद्याकारत्वम्; किं तु पुरुषकारत्वस्यैव । श्रीशब्देन शृणोति इत्यादिव्युत्पत्तिबोध्यत्वेन तत्रैव वेद्यत्वात् । ततश्च पुरुषकारद्वारकमुपायत्वं श्रीशब्दवेद्यमित्युक्तं भवति । एवम्, लक्ष्म्याः पुरुषकारत्वव्यतिरेकेणोपायत्वस्याभावात् तत्त्वेनोपायत्वस्य भरस्वीकारप्रार्थनापूर्वभावित्वाच्च, उपायत्वदृष्टान्तेन न पुरुषकारत्वस्य सापेक्षत्वमिति निर्हेतुकत्वसिद्धिरिति ॥

संग्रहः ;

मन्त्रे (शरण) शब्दो हि विशिष्टोपायबोधकः । तस्माद्गुणादिवल्लक्ष्म्या उपायत्वं च सिध्यति ॥

इति चेत्तन्न (शरण) शब्देनोपायतोच्यते । सा हि लक्ष्म्याः प्राथमिके पदे प्राप्ता यतो भवेत् ॥
रूढिर्न शब्दव्युत्पत्तिशास्त्रं विफलमापतेत् । साऽपि सद्वारका प्रोक्ता श्रीयतेत्यादिशक्तितः ॥
अद्वारका सा शरणशब्दे प्राप्तेति चेन्न तत् । विशिष्टस्य विधौ यद्वा द्वारकत्वविधावपि ॥
उपक्रमविरोधश्च व्यापारविरमो यतः । अतः (शरण) शब्देन विशेष्योपायतोच्यते ॥
घटकत्वकृतोपायभावाल्लक्ष्मीविशेषणम् । शरणत्वस्य लक्ष्म्यादिसमानाश्रयता यतः ॥
सामानाधिकरण्यार्थो वेद्या साऽपि भवेत्ततः । अश्लेषनाशश्रुत्यर्थरक्षासंकल्पयोर्यतः ॥
वैरूप्यं नात्र शरणं लक्ष्मीः प्रोक्तानपायिनी । इति ॥

इति लक्ष्म्याः गौणोपायत्वनिषेधाधिकारः ॥१०॥

॥११॥ अथ लक्ष्मीविभुत्वभङ्गाधिकारः ॥

विश्लेषदशैयिल् चेतननैत्तिरुत्तुम्

मा भूत् वेदशास्त्रे लक्ष्म्या उपायत्वसिद्धिः; भगवच्छास्त्रे तु तत् स्यात्, इति शङ्कया सङ्गतिः ॥

संशयस्तु; पुरुषकारे निर्हेतुकत्वं नास्ति? उतास्तीति । तदर्थं, लक्ष्म्या उपायत्वमस्ति? उत नास्तीति । तदर्थम् 'संसारो लक्ष्मीनिग्रहफलम्, उत नेति । तदर्थम्, लक्ष्म्याः अन्तः प्रविश्य नियमनमस्ति, उत नास्तीति । तदर्थम्, तत्स्वरूपं विभु, उत नेति ।तदर्थम्, लक्ष्म्या ईश्वरतत्त्वान्तर्भावपराणि भगवच्छास्त्रवचनानि श्रुतिबाध्यानि न भवन्ति? उत भवन्तीति । तदर्थम्, तेषां वैभवपरत्वं न संभवति, उत संभवतीति । तदर्थं वैभवपरत्वे निदानं नास्ति उतास्तीति । यदा नास्ति तदा वैभवपरत्वाभावेन निरवकाशतया श्रुतिबाधायोगात् लक्ष्म्याः ईश्वरतत्त्वत्वेन विभुत्वात् अन्तर्नियन्तृत्वेन संसारस्य तन्निग्रहरूपत्वादुपायत्वसंभवेन तद्वदेव तत्पुरुषकारभावोऽपि सहेतुकः । यदा वचनानां वैभववादत्वे निदानमस्ति; तदा भगवच्छास्त्रस्य वैभववादत्वेन श्रुतिबाध्यत्वात् लक्ष्म्याः ईश्वरतत्त्वत्वाभावेन विभुत्वासिध्द्या, अन्तर्नियमनाभावेन संसारस्य तन्निग्रहफलत्वाभावादुपायत्वासिद्धिरिति, न तद्दृष्टान्तेन पुरुषकारत्वसहेतुकतासिद्धिरिति । पूर्वोत्तरपक्षयोः फलफलिभावः ॥

पूर्वपक्षस्तु; मा भूत् वेदशास्त्रे लक्ष्म्या उपायत्वसिद्धिः । भगवच्छास्त्रेषु तत्सिद्धिरव्याहता । चरमश्लोकादाविव भगवतः स्वातन्त्र्येण लक्ष्म्या अपि मोक्षार्थं तत्समाश्रयणं हि विहितम् । * मामेकां देवदेवस्य महिषीं शरणं व्रजेत् । सर्वकामप्रदां रम्यां संसारार्णवतारिणीम् ॥ * इत्यादिना; न च, संसारस्य लक्ष्मीनिग्रहरूपत्वाभावात् तदुपायत्वासंभवः । तत्स्वरूपस्य विभुत्वेन सर्वनियन्तृत्वात् । तथा च वचनानि । * अनन्तनामधेया च शक्तिचक्रस्य नायिका । जगच्चराचरमिदं विश्वं व्याप्य व्यवस्थिता ॥ त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् । * लक्ष्म्या समस्तं चिदचित्स्वरूपं व्याप्तं तदीशस्य तु सापि सर्वम् । * न च ज्ञानव्याप्त्यान्यथासिद्धिराशङ्कनीया * तथा लक्ष्म्याः स्वरूपं च शृणु वक्ष्ये समासतः । गुणतश्च स्वरूपेण व्याप्तिस्साधारणी मता ॥ यथा मया जगद्व्याप्तं स्वरूपेण स्वभावतः । तथा व्याप्तमिदं सर्वं नियन्त्री च तथेश्वरी ॥ मया व्याप्ता तथा साऽपि तया व्याप्तोहमीश्वरः । मम तस्याश्च सेनेश! वैलक्षण्यमिदं शृणु ॥ मच्छेषभूता सर्वेषामीश्वरी वल्लभा मम । तस्याश्च

जगतश्चाहमीश्वरो वेदविश्रुतः ॥ तस्या ममापि शेषं हि विभूतिरुभयात्मिका । इति श्रुतिशिरस्सिद्धं मच्छास्त्रेष्वपि मानद ॥ तथा भूमिश्च नीळा च शेषभूते मते मम । यथात्मनां तु सर्वेषां ज्ञानतो व्याप्तिरिष्यते ॥ स्वरूपतस्तु न तयोः व्याप्तिर्वेदान्तपारगा । * इति विशेषवचनात् । न चात्रान्तर्व्याप्तिर्न श्रुता । तदभावे नियमनासिद्धिः । * नियन्त्री च तथेश्वरी * इति बाह्यनियमनेऽप्युपपन्नम्, इति वाच्यम् * अन्तस्स्थिता सा सर्वेषां भावानामिति निश्चयात् * इत्यादिसत्त्वात् ॥

ननु, चान्तः प्रविश्य नियमनं जगत्कारणत्वपूर्वकं वाच्यमिति चेत् * ताविमावेकधैवोक्तौ भेद्यभेदकभावतः । अपृथक्त्वेन शास्त्रेषु जगद्धेतुतयोदितौ * इत्यादिसत्त्वात् । नन्वनुप्रविश्य नियन्तृत्वे पुंस्त्वापत्तिः । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ * इति लक्षणकथनादिति चेन्न ; लोकशब्दस्य स्वव्यतिरिक्तचेतनाचेतनपरत्वात् । लक्ष्मीविषये ईश्वरस्य स्वव्यतिरिक्तचेतनत्वेन तदनुप्रवेशादेरभावात् लक्षणासिद्धेः । न च, विभुत्वे चित्तत्त्वानन्तर्भावात् ईश्वरनियन्तृत्वाभावेनेश्वरतत्त्वत्वाभावाच्च; चतुर्थतत्त्वत्वापत्तिः । शेषत्वे सति ज्ञातृत्वस्य चेतनलक्षणस्य सत्त्वेन चेतनकोट्यन्तर्गतत्वात् । जगत्कारणत्वादिना ईश्वरकोट्यन्तर्गतत्वसंभवाच्च । न च विभुत्वे सत्यज्ञानादेः ब्रह्मलक्षणत्वानापत्तिः । ब्रह्मस्वरूपे अन्तर्व्याप्त्यनभ्युपगमेनानन्तत्वविरहात् । न चैवमव्यापकतापत्तिः । ब्रह्मस्वरूपस्य तद्गुणादिष्वन्तर्व्याप्तिशून्यत्वेऽपि, विभुत्ववत् अस्या ब्रह्मस्वरूपे अन्तर्व्याप्तिशून्यत्वेऽपि तदुपपत्तेः । न च कारणत्वनियन्तृत्वयोरभ्युपगमे * एकमेवाद्वितीयम् * क्षरात्मानावीशते देव एकः * इत्यादिविरोध इति वाच्यम् । वेदान्ते, सद्ब्रह्मदेवादिशब्दानां लक्ष्मीविशिष्टब्रह्मवाचकत्वाभावेऽपि विशिष्टकारणत्वादेस्तात्पर्यगोचरतया तत्रत्यनिषेधवचनानां लक्ष्मीविशिष्टव्यतिरिक्तनिषेधपरत्वात् । अत एवोच्यते ; * तत्तद्गौरवमाश्रित्य तन्त्रवेदान्तपारगैः । जगद्धेतुतया देवावेकैकावेव दर्शितौ ॥ * इति, * इति श्रुतिशिरस्सिद्धं मच्छास्त्रेष्वपि मानद * इति च । अभियुक्तैरपि * न पृथगभिधत्ते श्रुतिरपि * इति । एवम्, वेदान्ततात्पर्यसिद्धमेव जगत्कारणत्वादि भगवच्छास्त्र उपबृंह्यते । अतः, विभुत्वकारणत्वान्तः प्रवेशनियमनादेः वेदान्ततात्पर्यसिद्धस्य आगमे उपबृंहितत्वात् संसारस्य नियन्त्र्याः लक्ष्म्या अपि निग्रहफलत्वात्तदुपायत्वसिद्धिः । तस्मात् निग्रहशान्त्यर्थं प्रथममुपायत्वेनाश्रयणीया । अनन्तरम्, तत्पुरुषकारेण भगवानाश्रयणीय इति ॥

अत्रोच्यते ;

(विश्लेषदशैथिलीश्वरनैत्तिरत्तुम्)

अत्र, नित्यानपायिन्यास्स्वतो विश्लेषासंभवात् तस्मिन् सोपाधिके वक्तव्ये विग्रहोपाधिको वा वाचकोपाधिको वा विश्लेषो भवति । तत्र विग्रहोपाधिकः कादाचित्कः । न सार्वत्रिक इति वाचकशब्दप्रयुक्तो विश्लेषोऽत्राभिमतः । चेतनवशीकारे अस्याः चेतनसजातीयत्वस्याभ्यर्हितोपायत्वात् । तद्वाचकशब्दवाच्यत्वमत्राभिप्रेतम् । स च * मकारो नारशब्दश्च * इति श्रियस्तद्वाच्यत्वे * माङ् माने * इति धातोः * नृ गतौ * इति धातोश्चाणुत्वसिद्धौ विभुत्वप्रतिपादकस्मृतिवचनानि विरोधाधिकरणनयेन बाधितानीत्यर्थः । न च मकारनारशब्दवाच्यत्वासिद्धिः ; मकारवाच्यत्वाभावे लक्ष्म्याः भगवच्छेषत्वासिद्धिप्रसंगात् । समस्तशब्दमूलप्रणवे तदसिद्धौ सर्वत्र तदसिद्धिप्रसंगात् । नारशब्दवाच्यत्वं चागमे नारशब्दव्याख्यानेऽभिहितम् । * ज्ञानादयो

गुणाः रूपं लक्ष्मीः नित्यानपायिनी * इति । भाष्यकारैरपि गद्ये नारशब्दार्थत्वेन साऽभिहिता । * योऽसौ श्रियः श्रीः परमा, तेन नारायणस्स्मृतः * इति, हारीतस्मृतिश्च ॥

एवमनणुत्वस्य श्रुतिबाधवत् सत्यज्ञानादिवाक्यविरोधोऽप्यस्ति । लक्ष्म्या अप्यनन्तत्वे तस्य लक्षणत्वायोगात् । न च तत्र विशिष्टस्य लक्षणत्वं विवक्षितमिति वाच्यम् । अणुत्वपरमूलमन्त्रविरोधात् । सत्यादिपदानां द्विवचनान्ततापत्तेश्च । न च सत्यादिपदावाच्यत्वेऽपि ईश्वरस्वरूपस्य सदृशलक्ष्मीस्वरूपसुश्लिष्टत्वात् । अर्थसामर्थ्येन सत्यादीनां लक्ष्मीस्वरूपलक्षणत्वसिद्धिरिति वाच्यम् । लक्ष्म्यास्तादृशस्वरूपस्यागमात्सिद्धौ अर्थसामर्थ्यात्; वेदेऽपि तत्तात्पर्यकल्पनम्; वेदस्य तत्तात्पर्ये सिद्धे तदविरोधेनागमस्य तादृशस्वरूपबोधकत्वम् इत्यन्योन्याश्रयात् । प्रवृत्तिनिमित्ते सति शब्दस्य तत्र तात्पर्ये च सति वृत्त्याबोधकत्वविवक्षायाः अन्याय्यत्वात् । तद्विवक्षायां च पदानां द्विवचनतापत्तिः । अतस्सत्यादिवाक्यानां विशिष्टलक्षणत्वे तात्पर्याभावात्, लक्ष्मीविभुत्ववचनानां तद्बाधो युक्तः ॥

किंच, स्वरूपव्याप्तिः अन्तरपि विवक्षिता? बहिरेव वा? नाद्यः, ईश्वरस्वरूपेऽन्तर्व्याप्तेरभावात् । न चेष्टापत्तिः । मध्यमपरिमाणत्वेनानित्यतापत्तेः । न चेश्वरस्वरूपस्य स्वगुणव्यापकत्वाभावेऽपि तदुपपत्तिवदत्रापि संभवः । तत्र द्रव्यभूतगुणेष्वन्तर्व्याप्तिसत्त्वेऽपि व्यापकगुणैरेव सगुणत्वसंभवात् । ननु, लक्ष्मीस्वरूपस्येश्वरस्वरूपान्तर्गतत्वेऽपि तत्र नियन्तृत्वं नास्तीति चेत्, न; असंकुचितज्ञातृत्वयुक्तस्य तदभावानुपपत्तेः । तत्रापि नियन्तृत्वे * न तस्येशे कश्चन * इत्यादिविरोधः । न द्वितीयः; अणुत्वश्रुतिविरोधात्; संसारस्य तन्निग्रहफलत्वानापत्तेश्च । * एष एवासाधु कर्म कारयति तं यमधो निनीषति * इत्यन्तर्यामिणो निग्राहकत्वात् । सर्वान्तरत्वे नारायणशब्दवाच्यता च स्यात्, ततश्च द्वये श्रीशब्दद्वयस्य वैयर्थ्यं स्यात् । चरणानित्यपि स्यात्; विभुत्वेन नियन्तृतया सर्वात्मकत्वे चेतनाचेतनवाचकसर्वशब्दवाच्यता स्यात् । सा च * अर्थो विष्णुरियं वाणी * इति निषिद्धा । तथात्वे, सर्वशब्दमूलभूताकारवाच्यताऽपि स्यात् । न चेष्टापत्तिः । तत्रार्थसंप्रदायविरोधात् । * उकारेणोच्यते लक्ष्मीः * इति वचनविरोधश्च । लोकत्रयशब्दस्येश्वरान्यत्रिविधचेतनाचेतनपरत्वात्; नियन्तृत्वेन धारकत्वे पुरुषोत्तमत्वापत्तिश्च; विभुत्वे, तत्त्वत्रयबहिर्भावश्च । एकदेशलक्षणसत्त्वेऽपि पूर्णलक्षणाभावात् तस्यैव तत्त्वनियामकत्वात् । शेषत्वादीश्वरत्वाभाववत् अनणुत्वाच्चेतनबहिर्भावापत्तेः आवश्यकत्वात्; अन्यथा भोक्ता इत्यादिश्रुतिविरोधः । एवं विभुत्वस्यानेकोपपत्तिप्रमाणबाधितत्वात् तत्परवचनानि वैभवपराणि ॥

न च नीलादिव्यावर्तनेनात्र तथोक्तौ प्रशंसानिदानं किमपि वाच्यम्; तन्न दृश्यते इति, ईश्वरस्वरूपव्यापकस्य लक्ष्मीधर्मभूतज्ञानस्य, भगवत्स्वरूपस्येव तद्गतजगत्कारणत्व, सर्वान्तरत्व, सर्वनियन्तृत्वादिसमस्तवैभवहेतुत्वात् । व्यापकस्वरूपस्य यद्यत्कार्यं तत्सर्वमनेन धर्मभूतज्ञानेन निर्वाह्यत इति तदेव लक्ष्मीस्वरूपत्वेनोपचर्यते यथाऽजडत्वादिगुणसाम्यात् शुद्धसत्त्वे ज्ञानत्वव्यपदेशः । गुणप्रकाशकत्वादिसाम्यात् विग्रहे षाड्गुण्यव्यपदेशः । यथा वा अहङ्कारकार्येष्विन्द्रियेषु भूतानामाप्यायकत्वेन तज्जन्यत्वव्यपदेशः । तथा, विभुस्वरूपकार्यस्य जगत्कारणत्वादेः एतद्धर्मभूतज्ञानस्य सहकारित्वेन कारणत्वात् तत्र स्वरूपत्वव्यवहारः । महिष्यन्तरधर्मभूतज्ञानं तु नैवं रूपम् । अतः यथा भगवत्स्वरूपं स्वगतसमस्तमङ्गलगुणादिकं प्रति धर्मित्वेन हेतुभूतम् । तथा तत्स्वरूपव्यापकं धर्मभूतज्ञानमपि तद्गतसर्वमङ्गलगुणसहकारिकारणमिति तत्र स्वरूपत्वोक्तिः । यथा,

लक्ष्मीकटाक्षलेशयोगात् चतुर्मुखादीनां सश्रीकत्वम्, एवमेव स्वरूपस्याणुत्वेऽपि तद्धर्मभूतज्ञानेन स्वरूपमात्रस्य सश्रीकत्वमुपपद्यते । एतद्विवक्षया श्रीशास्त्रे, स्तोत्रे, गद्ये च, तत्स्वरूपानन्त्योक्तिः एवं बीजस्थानीयस्य भगवतो जगत्कारणत्वे जलसेकवत् लक्ष्मीधर्मभूतज्ञानस्य सहकारितया जगत्कारणत्वोक्तिः । तथा, भगवत्स्सर्वनियन्तृत्वे तदुपयुक्तज्ञानशक्त्याद्युद्बोधकतया सर्वान्तरत्वोक्तिश्च । अन्यथा * एकमेवाद्वितीयम् * ईशते देव एकः * इत्यादिशब्दानां द्विवचनान्तत्वापत्त्या वेदान्तानामतत्परत्वस्य पूर्वमेवोक्ततया तत्तद्वाक्यस्थनिषेधवचनानां लक्ष्मीकारणत्वादिनिषेधपरत्वात् । अन्यथा, कारणवाचकाकाङ्क्षोच्यतापत्तिः । जगज्जन्मादेरीश्वरलक्षणत्वाभावापत्तिश्च । एवम्, धर्मभूतज्ञानस्य भगवत्स्वरूपादिसकलव्यापकत्वेन तत्तत्सकलवैभवहेतुत्वात् सर्वभावानुगामित्वं तद्धर्मधर्मित्वादिकमप्युपपन्नम् । अत एवोच्यते ; * श्रद्धया देवो देवत्वमश्नुते * इत्यादि । तस्मात् विभुत्ववचनानामीश्वरस्वरूपानुबन्धित्वेन सकलवस्तुगतधर्मभूतज्ञानपरत्वम्, कारणत्वादिपराणामन्तरङ्गसहकारिपरत्वम्, नियन्तृत्ववचनानां तदुपयोगिज्ञानशक्त्याद्युद्बोधकत्वपरत्वं चोचितम् । श्रुतिविरोधे स्मृतीनामेव संकोचस्येष्टत्वात् ॥

न च * ईश्वरीं सर्वभूतानाम् * इति श्रुतिरेव सर्वनियमनमसंकुचितमाह ; अतः अन्तर्बहिश्च व्याप्तिसिद्धिः इति वाच्यम् । यतः * क्षरात्मानावीशते देव एकः * इतीश्वरान्तरनिषेधकण्ठोक्तया सावकाशा उदाहृतश्रुतिः बाह्यनियमनपरा ; * अस्येशाना जगतो विष्णुपत्नी * इत्यत्र नियमनस्य पत्नीत्वोपाधिकत्वश्रवणात् ॥

ननु, उक्तप्रकारेण लक्ष्म्या अनन्तत्वम्, सर्ववस्तुशरीरत्वलक्षणं न भवति ; किं तु आकाशादिवदन्तर्बहिश्च व्याप्तत्वमात्रम् ; कारणत्वादिकमपि स्वरूपस्य तत्तत्सहकारित्वम् ; एवमभ्युपगमे विभुत्ववचनानां मुख्यत्वं सिध्यतीति, तथात्वे न कोऽपि विरोधोऽस्ति, इति चेत् नैवम् ; अणुत्वश्रुतिविरोधात्, तत्त्वान्तरत्वापत्तेश्च । तस्माद्विभुत्वं न स्वरूपगतम् । अथवा, चेतनाचेतनयोरन्तर्बहिश्च प्रत्येकं परिसमाप्य वर्तमाने ब्रह्मस्वरूपे अणुत्वपरिमाणं लक्ष्मीस्वरूपमपि तत्र तत्र वर्तत इति व्यापकमित्युच्यते । एवम्, निरूपकत्वेन स्वरूपान्तर्गतत्वात् स्वरूपगतं कारणत्वादिकमपि लक्ष्मीस्वरूपगुणमित्युच्यते । निरूपकत्वं च नीलादीनां नास्तीति तद्व्यावृत्तिः विभुत्वादिना प्रतिपाद्यते । निरूपकत्वं च विग्रहस्य श्रीवत्सवत् अणुत्वेऽप्युपपद्यते * यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम * इत्याद्यपि निरूप्यस्य सर्ववस्तुषु परिसमाप्य विद्यमानत्वात् अणुत्वेन तत्र तत्र विद्यमानत्वाभिप्रायम् ; विग्रहव्याप्त्यभिप्रायं वा भवेत् । तस्मात् लक्ष्म्या अविभुत्वेन नियन्तृत्वाभावात् संसारस्य तन्निग्रहरूपत्वाभावेन तन्निवृत्तौ हेतुत्वमिति ॥

संग्रहस्तु ;

विभुत्वेन नियन्तृत्वाल्लक्ष्म्या निग्रहरूपता । यतो बद्धस्य तत्रापि शरण्यैवेति चेन्न तत् ॥
मकारनारवाच्यत्वात् श्रियो वैभवबोधिकाः । स्मृतयो बाधमर्हन्ति विरोधेत्विति नीतितः ॥
सत्यादेर्लक्षणत्वाच्च तत्त्वत्रित्वस्य भङ्गतः । ईश्वरस्य स्वरूपान्तरभावात्तदनित्यता ॥
भावे च परमात्मत्वभङ्गो विष्णोर्यथाभवेत् । अब्रह्मायनशब्दादिवाच्यता च भवेद्यतः ॥
अन्तर्नियमने स्त्रीत्वभङ्गश्च स्मृतितो भवेत् । नियन्त्रन्तरशून्यत्वश्रुतिबाधः प्रसज्यते ॥
जन्मादेर्लक्षणत्वं च भग्नं भवति वै यतः । तस्माद्विभुत्वहेतुत्वनियन्तृत्वादिका गुणाः ॥

त्व (य) त्कटाक्षाद्धरेस्तेन विभुत्वादिगुणान्विता । सर्ववस्तुषु साकल्याद्विष्णोर्वृत्तेर्निरूपिका ॥
सर्वगा कथिता लक्ष्मीस्स्मृतौ च स्तोत्रगद्ययोः । तस्मादणुस्वरूपाया नियन्तृत्वाद्यभावतः ॥
अतन्निग्रहरूपस्य बन्धस्य विनिवृत्तये । न हेतुत्वं तथा लक्ष्म्या मातृत्वस्य च भङ्गतः ॥

इति लक्ष्मीविभुत्वभङ्गाधिकारः ॥ ११ ॥

पुरुषकारत्वे प्रमाणतया तृतीयाधिकारोक्तस्य श्रीरामायणस्योपबृंह्यमंशमाह —

इरुवरैयुम् तिरुत्तुवदुमुपदेशत्ताले

अनेन शृणोति श्रावयतीति व्युत्पत्तिद्वयार्थ उक्तः ।

प्रमाणस्याबाधितार्थत्वमाह —

उपदेशत्ताले इरुवरुडैयवुम् कर्मपारतन्त्र्यम् कुलैयुम्

श्रीयत इति व्युत्पत्तिमाह —

उपदेशत्ताल् मीळादपोदु चेतननैयरुळाले तिरुत्तुम्

श्रयत इति व्युत्पत्तिमाह —

ईश्वरनैयळगाले तिरुत्तुम्

इति श्रीवचनभूषणमीमांसाभाष्ये विरोधपरिहारे प्रथमस्य परिच्छेदस्य प्रथमं प्रकरणम् ॥

॥ १२ ॥ अथ भगवन्निर्हेतुकोपायत्वप्रकरणे प्रपत्तिविधिनिरूपणाधिकारः ॥

एवमत्र पुरुषकारप्रकरणे पुरुषकारत्वस्य निर्हेतुकत्वं तस्य सकिंचनानधिकारत्वम्, अकिञ्चनाधिकारत्वम्, तद्विरोधिस्वतन्त्रोपायत्वराहित्यं, परतन्त्रोपायत्वराहित्यम्, तद्विरोधिविभुत्वराहित्यं चेति अर्थषट्कं क्रमेणाधिकारषट्केण निरूपितम् । इतः परम त्रिप्रकरण्यामुपायस्वरूपं निरूप्यते । श्रीशब्दार्थे पुरुषकारे निरूपितेऽवशिष्टार्थः परिच्छेदशेषेण निरूप्यते ॥

तत्र द्वितीयप्रकरणे नारायणशब्दार्थसिद्धोपायस्वभावनिरूपणेन शरणशब्दोपस्थापितोपायत्वस्य निर्हेतुकत्वमुच्यते । तत्र, तृतीयप्रकरणे मतुप्प्रत्ययार्थभूतदेशकालाद्यनियमानुबन्धिस्वभावनिरूपणेनाहेतुकत्वमुच्यते । चतुर्थप्रकरणे क्रियापदार्थभूतवरणस्वभावनिरूपणेन तन्निर्हेतुकत्वमुच्यते । तत्र सिद्धोपायस्वभावः मन्त्रोपबृंहणभूते चरमश्लोके विस्मृत [विवृत] इति तदर्थनिरूपणमुखेनोपायत्वस्य निरपेक्षत्वमुच्यते । तत्र प्रथमाधिकारे * व्रज * इति विध्यनुपपत्त्या वरणस्यैव हेतुत्वान्निरपेक्ष्यमसिद्धमित्याशंक्य, अधिकारिविशेषणत्वेऽपि तदुपपत्तेः वरणस्याहेतुत्वमुच्यते । द्वितीयाधिकारे वरणस्य हेतुत्वाभावे * मोक्षयिष्यामि * इति भगवदङ्गीकारानुपपत्तिरित्याशङ्क्य त्वाशब्देन सदोषस्याप्यङ्गीकारश्रवणात् न वरणस्य हेतुत्वमिति स्थाप्यते । तृतीयाधिकारे अहं शब्देन सत्यसंकल्प-

त्वोक्त्या सदसत्कर्मसंकल्पभङ्गानुपपत्तेः वरणस्य हेतुत्वमित्याशङ्क्य मांशब्दार्थभूतवात्सल्यादिभङ्गप्रसङ्गेन कश्चित्संकल्पभङ्गोऽप्यस्तीति वरणस्याहेतुत्वमेवोच्यते । चतुर्थाधिकारे * मा शुचः * इति कृतकृत्यत्वविधानान्यथाऽनुपपत्त्या वरणस्य हेतुत्वमित्याशङ्क्य, तदा त्वाशब्दोपस्थापितानूदितभरसमर्पणत्वस्य * मोक्षयिष्यामि * इति परार्थभूतस्वीकृतभरत्वस्य च हान्यापत्तिरिति वरणमनुपाय इति स्थाप्यते ॥

तत्र, प्रथमं सिद्धोपायस्य नैरपेक्ष्यं स्वभाव इत्येतत् चरमश्लोके प्रतिपाद्यत इत्याह —

अरियादनंवित्यादि

चरमोपायपर्यन्ताज्ञातार्थान् ज्ञापयतीत्याचार्यकृत्ये नैरपेक्ष्यदर्शनात् * मित्रमौपयिकं कर्तुं रामः * इतिवत् * शरणं व्रज * इति पुरुषकारकर्तव्योपदेशस्य स्वेनैव करणे निरपेक्षत्वदर्शनात् * अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि * इत्युपायकृत्य करणे सापेक्षत्वादर्शनाच्च चरमश्लोके महाभारतसारभूते निरपेक्षत्वं भगवत इत्यवगतमित्यर्थः ॥

अत्रैवं संशयः; किं भगवतो निरपेक्षत्वं स्वरूपं न भवति? उत भवतीति । तदर्थं निरपेक्षत्वे सर्वमुक्त्यादिप्रसंगः सर्वशास्त्रवैयर्थ्यं च भवति? उत न भवतीति । तदर्थं निरपेक्षत्वस्य प्रतिनियतविषयत्वं न संभवति, उत संभवतीति । तदर्थं शरणागतिस्साधनम्? उताधिकारिविशेषणमिति । तदर्थम्, अधिकारिविशेषणविधिर्न संभवति? उत संभवतीति । यदा न संभवति तदा व्रज इत्यस्य साधनविधित्वेन शरणागतेस्साधनतया शरणागतेः निरपेक्षत्वस्य प्रतिनियतत्वासंभवेन सर्वविषयतायां सर्वमुक्त्यादिप्रसंगः । भक्त्यादिसाधनविधायकशास्त्रवैयर्थ्यप्रसंगश्च भवतीति भगवतो न नैरपेक्ष्यं स्वभाव इति पूर्वपक्षे फलफलिभावः ॥

यदा, अधिकारिविशेषणविधिस्संभवति; तदा, व्रज इत्यस्याधिकारिविशेषणविधित्वात् शरणागतेरसाधनतया शरणागतपुरुषनिरपेक्षत्वस्य प्रतिनियततया सर्वमुक्त्यादिप्रसंगाभावेन भगवतो नैरपेक्ष्यं संभवतीति सिद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु; भगवदुपायत्वस्य निर्हेतुकत्वमनुपपन्नम्, अप्रामाणिकं च । न तावत् तत्र श्रुतिः प्रमाणम् । वेदे तादृशवाक्यस्य क्वाप्यदृष्टेः । न च पूर्वकाण्डे तदस्ति । * वायुमेव स्वेन भागधेयेनोपधावति । स एवैनं भूतिं गमयति * स तया श्रद्धया युक्तः तस्याराधनमीहते * लभते च ततः कामान् मयैव विहितान् हितान् * इत्यादिश्रुतिस्मृतिषु तत्तत्कर्माराधिततत्तद्देवतान्तर्यामिणो रक्षकत्वश्रवणात् । उपरितनभागेऽपि भोगमोक्षहेतुतया नानाविधोपासनविधानेन तत्तदुपासनविशेषोपास्यस्य ब्रह्मणः तत्तत्फलप्रदत्वेन सर्वत्रोपासनरूपहेतुदृष्टेः * संसारबन्धस्थितिमोक्षहेतुः * इत्यादिवाक्यसत्त्वेऽपि तत्र विधेयज्ञानान्तराभावेनोपाध्यश्रवणात् निर्हेतुकत्वप्रतीतावपि साध्योपायरहितस्य सिद्धोपायस्य फलप्रदत्वे सर्वमुक्त्यादिदोषप्रसंगात्, कर्मोपासनरूपसाध्योपायविधायकशास्त्रवैयर्थ्यापत्तेश्च । सर्वत्र साध्योपायसापेक्षस्य सिद्धोपायस्य फलप्रदत्वसिद्धिः । अत एव प्रणवे उपाध्यश्रवणात् रक्षणनिर्हेतुकत्वप्रतीतावपि नमसा उपायप्रतिपादनात् प्रणवावगतं रक्षकत्वमप्यौपाधिकमवगम्यते; एवमेव * संसारबन्धस्थितिमोक्षहेतुः * अमृतस्यैष सेतुः * इत्यादौ निरुपाधिकत्व-

प्रतीतावपि * ज्योतिष्टोमेन स्वर्गकामो यजेत * मुमुक्षुर्ब्रह्मोपासीत * इत्युपायविधायकशास्त्रबलात् अतिप्रसंग-वैषम्यादिदोषाच्च, तत्र श्रुतं भगवतस्सिद्धोपायत्वं साध्योपायसापेक्षमिति गम्यते । तथा च श्रुतप्रकाशिका, * शास्त्रप्रतिपाद्यमुपायोपेयात्मकं तत्र सिद्धोपाय उपेयं च ब्रह्म साध्योपायो भक्तिः * इति । ततश्च वेदवेदान्तयो-स्सर्वत्र सापेक्षत्वप्रतीतेः न श्रुतिस्तत्र प्रमाणम्; नापि स्मृतिः । यद्यपि * नासौ पुरुषकारेण न चाप्यन्येन हेतुना । केवलं स्वेच्छयैवाहं प्रेक्षे कंचित्कदाचन ॥ निर्हेतुककटाक्षेण मदीयेन महामुने । * इत्यादिसंभवः । तथाऽपि, सर्ववेदान्तप्रत्ययनयेन साध्योपायसापेक्षस्य, सिद्धोपायस्य फलप्रदत्वे निश्चिते विरोधाधिकरणनयेन स्मृतेर्बाध्यत्वात् । न चाधिकारिभेदकल्पनेन व्यवस्थितविकल्पसंभवः । श्रुतिस्मृत्योस्तुल्यबलत्वाभावेन तत्कल्पकविरोधाभावात् । तुल्यबलविरोधे हि विकल्पसंभवः । तर्हि * नायमात्मा प्रवचनेन लभ्यः * इत्यादिश्रुतिरुक्तस्मृत्यनुग्राह्यास्ति । तत्रोपायान्तरव्यवच्छेदेन निरपेक्षत्वं सिद्धोपायस्योक्तमिति चेत् न; उदाहृतश्रुतेः भक्तिपरत्वेन भाष्यकारैर्व्याख्यातत्वात् । न च वाच्यम्, उक्तश्रुतेः भक्तिपरत्वेन व्याख्या चरमश्लोकस्य भक्तिपरत्वयोजनावत्, उक्तस्मृत्यानुगुण्यात् शब्दस्वारस्याच्च तथा योजनान्तरस्य न बाधिकेति मुमुक्षुसामान्ये निर्हेतुकविषयीकारकल्पने श्रवणादिविधिवैयर्थ्यात्, अधिकारिविशेषे तत्कल्पने ईश्वरस्य वैषम्यनैर्घृण्यापत्तेश्च ॥

न च वैषम्यादेः निरङ्कुशस्वातन्त्र्यकृतत्वाददोषत्वम् । तादृशवैषम्यावहस्वातन्त्र्यस्यापि दोषत्वात् । * वैषम्यनैर्घृण्येन सापेक्षत्वात् * इति तत्र वैषम्यसामान्यस्य हि दोषत्वमुक्तम् । तत्र सापेक्षत्वहेतुना वैषम्या-भावसाधनात् । निरपेक्षत्वे तदुभयमवश्यं भवतीति हि सूच्यते । ततश्चेश्वरस्य निर्दोषत्वविधायकानेकश्रुति-स्मृतिविरोधः उक्तश्रुतिः केवलश्रवणादीनामनुपायत्वं वदति । स्मृतिश्च सिद्धोपायापेक्षया साध्योपायस्याप्राधान्य-परा ।

ननु, मुमुक्षुसामान्ये भगवतो निर्हेतुकरक्षकत्वं; अपि तर्हि, तद्विशेषे न च तादृशविशेषस्य दुर्निरूपता । सुनिरूपत्वे वा तस्यैव हेतुत्वमिति वाच्यम् । शरणागतेरेव विशेषत्वात् । तस्याश्चाधिकारिविशेषणत्वेना-हेतुत्वात् इति चेत्; मैवम् । विशिष्टविधिपक्षेऽपि वरणस्य विधेयत्वस्वीकारेणाधिकारिविशेषणत्वासिद्धेः । तस्य सिद्धत्वनियमात् । तदुक्तम् * सिद्धमेव हि सर्वत्र नियोज्यस्य विशेषणम् । जीवनादितथैवैकं कामनादि-विशेषणम् ॥ इति । अविधेयत्वस्वीकारे वाधिकारिविशेषणत्वम् । फलकामनारूपतया, फलतया, निमित्ततया वा? आद्यद्वितीययोरसिद्धिः । शरणागतेः फलत्वतत्कामनारूपत्वयोरभावात् । फलत्वेऽपि न स्वरूपतः तथात्वम् । किंतु कामनाविषयतया, न ह्यत्र तत्कामना श्रूयते; तथात्वे वा तदर्थसाधनान्तरविधानं दृश्येत । तृतीये निषिद्धतया निमित्तत्वे परिहरणीयता स्यात्; जीवनादिवत् केवलनिमित्तत्वे विधिप्रत्ययो न स्यात् । विधेयान्तरं च दृश्येत ।

किंच यदि विहितत्वाविशेषेऽपि शरणागतिरधिकारिविशेषणं स्यात्, भक्तिरपि तथा स्यात् । अत-स्सहजकारुण्यविशिष्टस्य सिद्धोपायस्यानाद्याज्ञातिलङ्घनेन कालुष्ये सति तत्कालुष्यशामकत्वेन साध्योपाय-स्सहकारीति अवश्यमभ्युपगमनीयम्; ततश्चेश्वरस्य प्रधानकारणत्वात्, साध्योपायस्याप्रधानकारणत्वाच्च, सिद्धोपायप्राधान्यविवक्षया शास्त्रेषु निर्हेतुकत्ववादः । अन्यथा, ईश्वरस्य वैषम्याद्यापत्तिः । सर्वमुक्त्याद्यापत्तिः । साध्योपायविधायकशास्त्रप्रामाण्यापत्तिश्च स्यात् । अतः ईश्वरस्य * अमृतस्यैष सेतुः * इत्याद्यवगतं सिद्धोपाय-

त्वम्, शक्तविषये भक्त्यादिसापेक्षत्वं, अशक्तविषये शरणागतिसापेक्षमिति न क्वापि निर्हेतुकत्वसिद्धिः ॥

किंच, न केवलं विधेयत्वात् शरणागतेरधिकारिविशेषणत्वाभावः * इदं शरणमज्ञानाम् * उपायोऽयं चतुर्थस्ते प्रोक्तश्शीघ्रफलप्रदः * इत्यादिषु उपायत्वकण्ठोक्तेश्च, तदभावोऽवगम्यत इति ॥

तत्राह ;

(अरियादनवित्यादि)

अत्रायं भावः ; न हि वयमीश्वरस्य सर्वत्र निर्हेतुकोपायत्वं ब्रूमः ; येन भोगमोक्षोपायान्तरविधायकशास्त्रानर्थक्यं स्यात् ; नापि मुमुक्षुसामान्यविषयमिति ब्रूमः । येन सर्वमुक्त्याद्यापत्तिः, ईश्वरस्य वैषम्याद्यापत्तिश्च स्यात् । किंतु शास्त्रविहिततत्तदुपायाभावस्थले शरणागताधिकारिविशेषं प्रति तथात्वम् । तत्र प्रतिपदविहितसाधनान्तराभावेनेश्वरस्य निर्हेतुकरक्षकत्वसिद्धेः ॥

न च तत्र शरणागतेरेवोपायत्वात् तदभावोऽसिद्धः । तस्या अधिकारिविशेषणत्वेनानुपायत्वात् । न च, फलतत्कामनानिमित्तान्यत्वेन तदसंभवः । साध्योपायान्तराधिकाराणां तथात्वेऽपि सिद्धोपायाधिकारस्य तद्भिन्नत्वसंभवात् । न च, विधिप्रत्ययानन्वयप्रसंगः । विधेयत्वस्वीकारात् । अत एवोक्तं रहस्यत्रये * अत्र पूर्वार्धेनाधिकारिकृत्यमाह ; अधिकारिकृत्यं चोपायपरिग्रहः । तत्साङ्गं विदधाति * इति । तर्हि, विधेयत्वमधिकारिविशेषणत्वं च व्याहतम् । सिद्धत्वसाध्यत्वावस्थयोरेकदा एकत्रायोगादिति न वाच्यम् । साध्योपायाधिकारस्य सिद्धत्वेऽपि सिद्धोपायाधिकारस्य साध्यतया केवलसाध्यत्वाभ्युपगमात् । न च, साध्यस्याधिकारिविशेषणत्वमप्रसिद्धम्, सिद्धस्योपायत्वेऽपि तथात्वात् ॥ * यदि अमृतस्यैव सेतुः * कृष्णं धर्मं सनातनम् * इत्यादिप्रमाणबलात्, दृष्टव्याप्तितिरस्कारेण सिद्धस्याप्युपायत्वमङ्गीक्रियते ; तर्हि, उपायस्य फलसंबन्धवत् अधिकारिसंबन्धस्यापि आवश्यकत्वे तत्र तस्यापि सिद्धत्वेऽतिप्रसंगात् सिद्धोपायश्रुत्यर्थापत्त्या तदधिकारस्य साध्यत्वं कल्प्यते । अत एव विधेयान्तरहानिरपि न बाधिका । सिद्धाधिकारस्य तद्व्याप्तेः । ततश्चात्र शरणागतिविशिष्टं ब्रह्म मोक्षसाधनतया विधीयत इति नाभ्युपगम्यते ; येन, निक्षेपरक्षायां सिद्धावस्थ शरणागतिवादोक्तदूषणापत्तिः । किंतु सिद्धोपायप्राप्तिकामस्य शरणागतिः कर्तव्यतया विधीयते * सिद्धोपायप्राप्तिकामश्शरणागतिं कुर्यात् * इति ॥

न च, सिद्धोपायकामना तज्ज्ञानपूर्विकेति, पूर्वं तदसिद्धिरिति वाच्यम् ; अमृतस्यैष सेतुः * इत्यादिवाक्यैः ब्रह्म सिद्धोपाय इति श्रवणदशायामेव विदितत्वात् । एवम् ब्रह्मणि सिद्धोपायत्वेन ज्ञाते तत्प्राप्तिः कथमित्यपेक्षायां * मुमुक्षुर्वै शरणमहं प्रपद्ये * सर्वधर्मान् * इत्यादिभिः तत्प्राप्तिसाधनं विधीयते । यथा ब्रह्मणः प्राप्यत्वाकारे तत्परवाक्यादवगते तत्प्राप्तीच्छायां तत्साधनत्वेन भक्तिर्विधीयते ; तथा ब्रह्मणः प्रापकत्वाकारे श्रुत्यावगते तत्प्राप्तीच्छायां जातायाम्, कर्तव्यतया शरणागतिर्विधीयते । एतेन सिद्धस्योपायस्य काम्यत्वासिद्धिरिति निरस्तम् । तत्प्राप्तेस्तथात्वात् । प्राप्तिश्च सिद्धोपायेन स्वीकार्यत्वम् ; स्वीकारश्च * मोक्षयिष्यामि * इत्येवं रूपः ॥

न च, शरणागतिरपि ब्रह्मणस्सिद्धोपायत्वज्ञानम्, तच्च पूर्वमेव वृत्तमिति वाच्यम् । श्रावणज्ञान-विधेयज्ञानयोस्समानविषयत्वेऽपि तदनुस्मृतिरूपस्य विश्वासात्मकप्रार्थनागर्भस्य विधेयत्वोपपत्तेः । अत एव विधेयज्ञानान्तराभ्युपगमात् न कुदृष्टिमतरीतिः । अत एव न कामनाधिकारत्वभङ्गोऽपि । सिद्धोपायप्राप्ति-कामनाया अधिकारत्वात् । अत्र * मोक्षयिष्यामि * इति संकल्परूपस्य परगतस्वीकारस्य फलत्वेन श्रुतेः तत्कामनैवाधिकारः; न तु, मोक्षकामना । उपायविशेषणत्वेन तदन्वयात् । * त्वमेवोपायभूतो मे भव * इति मोक्षस्योपायनिरूपकत्वेन साक्षादकाम्यत्वात् । अत एव रहस्यत्रये * उत्तरार्धेनोपायकृत्यं वदति * इत्युक्तम् । न तु रक्षककृत्यमिति । अत एव भक्तिविधायकवाक्ये * मामेवैष्यसि * इतिवत्, * सर्वपाप-विनिर्मुक्तो मामेवैष्यसि मा शुचः * इति फलश्रुतिर्न जाता ॥

ननु, * मोक्षयिष्यामि * इत्येवंरूपस्य भगवत्स्वीकारस्य शरणागतिप्रसन्नेश्वरकृत्यत्वात् शरणागतिः प्रसादनमित्यागतम्; ततश्च * प्रसत्त्यै तस्योक्ते प्रपदननिदिध्यासनगती * इत्युक्तप्रकारेण भक्तितुल्यता आगताः; अन्यथा भक्तेरप्यहेतुतापत्तिरिति चेत्; मैवम् । नात्र * मोक्षयिष्यामि * इत्येवंरूपस्य सिद्धोपायकृत्यस्य जनकत्वेन शरणागतिर्विधीयते; किंतु तत्प्रतिबन्धकाभावत्वेन । ईश्वरस्तूक्ताधिकारिविषये निर्हेतुककटाक्षमारभ्य प्रसन्न एव तिष्ठति । तदुक्तम् * वरद तव खलु प्रसादादृते शरणमिति वचोऽपि मे नोदियात् * इति ॥

अत एवोच्यते * भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिः प्रपत्तिः * इति । यतोऽस्याश्शरणागते-स्सिद्धोपायप्रवृत्तिप्रतिबन्धकाभावत्वेनारादुपकारकत्वम्; अत एवायं सिद्धोपायाङ्गविधिरित्यप्युच्यते । स्वर्ग-कामनावदुपायसंबन्धघटकत्वात् शरणागतेस्तद्विधिरधिकारिविशेषणविधिरित्यप्युच्यते । यद्वा पूर्वमप्रसन्नेश्वरस्य प्रपदनं शरणागतिरप्यस्तु, तथापि न भक्तितुल्यता; शरणागतेः स्वीकारहेतुभूतप्रसदनहेतुत्वात् । भक्तेः मोक्षप्राप्तिहेतुभूतप्रसदनहेतुत्वाच्च ।

ननु, यद्ययं प्रक्रान्तयोगं परिसमापयेत्, तदा न पूर्वोत्तरयोः फलं दास्यामि । समाप्ते तु तस्मिन् नेव दास्यामीत्येवंरूपस्य * मोक्षयिष्यामि * इति सङ्कल्पस्याश्लेषविनाशश्रुत्यर्थस्योपासकविषयेऽपि तुल्यत्वात् कथं वैषम्यमिति चेत्; उच्यते । उक्तसङ्कल्पस्योपासके यद्यर्थगर्भत्वात् तत्रोपासनसमाप्तिरेव मोक्षहेतुः । तत्रेश्वरस्य फलप्रदत्वमात्रम्; अत्राहमेव मोक्षयिष्यामीत्युक्तसङ्कल्पस्य यद्यर्थगर्भत्वविरहात् प्रक्रान्तयोगसमापन-मीश्वरकृत्यमित्यवगम्यते । तत्र साक्षात्कारपर्यन्तोपासनसमाप्तिः ईश्वरेण (चेतनेन) क्रियते । अत्र वरण-लक्षणोपासनारम्भे चेतनेन कृते सति फलपर्यन्ततत्समाप्तिरीश्वरेण क्रियते । सर्वेषामपि प्राप्तेः दर्शनपूर्वकत्व-नियमात्; अत एव * ददामि बुद्धियोगं तं येन मामुपयान्ति ते * इत्युच्यते । तत्रोपासकेनेश्वरस्याङ्गतया स्वीकृतत्वात् ईश्वरकृत्यमप्रधानम्, * ददामि * इत्युक्तिश्चामुख्या । अत्रोपायत्वेन स्वीकृतत्वात् वरणानन्तरं चेतनप्रवृत्त्यभावाच्चेश्वरकृत्यं प्रधानम् * ददामि * इत्युक्तिश्च मुख्या । अतः शरणागतेः प्रक्रान्तयोगपरिसमापन-पूर्वकमोक्षप्रदत्वौपयिककृपाहेतुत्वात्, भक्तेः मोक्षमात्रप्रदत्वहेतुकृपाजनकत्वाच्च महदन्तरम् ॥

यदि योगप्रारम्भभूतवरणस्य मोक्षेऽपि हेतुत्वम्; तदा भक्तिप्रारम्भस्यापि हेतुत्वे तत्समापनमहेतु स्यात् । तद्विशेषभूतं सङ्कल्पहेतुभूतवरणं संनिपत्योपकारकमिति तद्विधिरङ्गविधिर्वा स्यात् । एवं वरणस्य

प्रतिबन्धकाभावत्वे वा, प्रसादनत्वे वा तद्विधिरङ्गविधिः । तस्मात् सिद्धोपायप्राप्तिकामनैवाधिकारः शरणागतेः । तदुक्तं स्कान्दे * सर्वधर्मैकरूपं मां सर्वकामफलप्रदम् । सा प्रापयति सद्यो यत्सर्वधर्मैकरूपिणी * इति । भरद्वाजसंहितायाम् * तदेवं भगवान् प्रीतः प्रपत्त्या साधनं परम् । तयैव भक्तिवपुषा प्रीतः फलमपि स्वयम् * इति च ॥

ननु, * मुमुक्षुर्वै शरणमहं प्रपद्ये * इति मोक्षकामना नियोज्यविशेषणत्वेन श्रुता अतः तत्कर्तव्यत्वेन विधानात् शरणागतिर्मोक्षसाधनमिति चेत् उच्यते । मोक्षकामकर्तव्यत्वोपदेशमात्रात् न तद्धेतुत्वसिद्धिः; यथा कर्मज्ञानयोस्तत्कर्तव्यत्वेन विधानेऽपि तयोर्भक्त्यङ्गत्वम्; तथात्रापि सिद्धोपायाङ्गत्वात् परंपरोपायत्वविवक्षया तथाविधिरुपपद्यते । अतः शास्त्रविहितोपायः भक्तिः सिद्धोपायश्चेति द्विविध एव श्रुतप्रकाशिकायाम् * शास्त्रप्रतिपाद्यमुपेयोपायात्मकम्; तत्र सिद्धोपाय उपेयं च ब्रह्म, साध्योपायो भक्तिः * इति ॥

अत्र प्रपत्तिरित्यपि नोक्तम् । * भक्त्या परमया वाऽपि प्रपत्त्या वा महात्मनः * इत्यादिशास्त्रे प्रपत्तिशब्दः सर्वत्र प्रपत्तव्यसिद्धोपायपरोऽवगम्यते । न च भक्तिस्थलेऽपि सिद्धोपायत्वविवक्षया श्रुतप्रकाशिकोक्तिः न्यासस्य शास्त्रार्थत्वापत्तेः । ततश्च भक्त्यङ्गत्वत्वं कर्मज्ञानयोस्सिद्धोपायाङ्गत्वं च प्रपत्तेरभिप्रेत्य तथोक्तिरिति गम्यते । भक्तिस्थले प्रपत्तेरङ्गत्वात्, भक्त्युत्पत्तिं प्रति भगवतस्सिद्धोपायत्वेऽपि न तत्र मोक्षं प्रति तथात्वम्; किंतु फलप्रदत्वमात्रम् । न तूपायत्वफलप्रदत्वयोरभेदः । तयोरधिकरणद्वयफलत्वस्य पूर्वमुक्तत्वात् भेदसिद्धेः । तदेवं * व्रज * इत्यस्याधिकारिविशेषणविधित्वेन वा अङ्गविधित्वेन वा अन्यथासिद्धत्वात् । न तद्बलेन वरणस्य हेतुत्वमिति शरणागताधिकारिविशेषे भगवदुपायत्वस्य निर्हेतुकत्वसिद्धिरनिवार्येति ।

संग्रहस्तु;

अहेतुकमुपायत्वं सर्वलक्ष्यं हरेर्यदि । सर्वमुक्तिस्तथा शास्त्रमात्रं च विफलं भवेत् ॥
प्रपन्नमात्रलक्ष्यत्वे प्रपत्त्या तन्न सिध्यति । साध्यावस्थाप्रपत्तिश्च नाधिकारिविशेषणम् ॥
अतस्सर्वत्र भगवान् सापेक्षो रक्षणे स्मृतः । रक्षत्यहेतुकं श्रीशः प्रपन्नं परमुत्सुकः ॥
प्रपत्तिरत्राहेतुः किं त्वधिकारिविशेषणम् । साध्योपाये तत्तु सिद्धं सिद्धे साध्यं तदिष्यते ॥
विधेयान्तरहानिश्च विधिश्चातोऽत्र संगतः । अन्यथा तस्य सिद्धत्वादुपायस्य च सर्वदा ॥
अतिप्रसङ्गस्स्यात्तस्मात्स्वीकार्यं साध्यमेव तत् । प्रपत्तेरधिकारस्तु सिद्धोपायाप्तिकामना ॥
(प्रा) व्याप्तिश्च "मोक्षयिष्यामी" त्येवं स्वीकार्यतामुना । स्वतः प्रसन्नेश्वरस्य प्रसादे सा न कारणम् ॥
किंतु स्वयत्नाभावत्वात्प्रतिबन्धनिवारणम् । कारणत्वेऽपि मोक्षे न कारणं भक्तिवद्भवेत् ॥
उक्तस्वीकारहेतुत्वादन्यथातिप्रसङ्गतः । मुमुक्षावधिकारस्स्यात्सा तथाऽपि न साधनम् ॥
मुमुक्षुकर्तव्यतया विहितज्ञानकर्मणोः । भक्त्यङ्गता तथा तस्याः सिद्धोपायाङ्गता भवेत् ॥
तस्माच्छरण्यश्शरणागतं रक्षत्यहेतुकम् ॥ इति ॥

इति भगवन्निर्हेतुकोपायत्वप्रकरणे प्रपत्तिविधिनिरूपणाधिकारः ॥ १२ ॥

॥ १३ ॥ अथ प्रपन्नस्वरूपनिरूपणम् ॥

(पुरुषकारत्तुक्कुमित्यादि)

यदि, शरणवरणमधिकारिविशेषणं स्यात् तदा, * मोक्षयिष्यामि * इत्युक्तभगवदङ्गीकारानुपपत्तिरिति पूर्वोक्ताक्षेपेणोत्थानात्सङ्गतिः ॥

पूर्वस्मिन्नधिकारे वरणस्य विहितत्वात् साधन वमित्याशङ्क्याधिकारिविशेषणत्वेऽपि विध्युपपत्तेरहेतुकत्वोपपत्तिरित्युक्तम् । अस्मिन्नधिकारे वरणस्याधिकारिविशेषणत्वे विद्याधिगमाभावेन तद्रहितदुष्टचेतनस्वीकारो न संगच्छत इत्याशङ्क्य त्वाशब्देन तादृशचेतनोपस्थापनात् तदङ्गीकारो युज्यत इति परिह्रियते ॥

अत्रैवं संशयः; मन्त्रे शरणशब्दोपस्थापितोपायत्वस्य निर्हेतुकत्वप्रतिपत्तिर्नास्ति, उतास्तीति । तदर्थं तदुपबृंहणे चरमश्लोके सिद्धोपायस्य निरपेक्षत्वस्वभावप्रतिपत्तिर्नास्ति; उतास्तीति । तदर्थं त्वाशब्दस्य विद्याधिगमरहितदोषदुष्टचेतनोपस्थापकत्वं नास्ति, उतास्तीति । तदर्थम् अर्जुनस्य दोषा न संभवन्ति, उत संभवन्तीति । तदर्थम्, दोषदुष्टगुणहीनचेतनाङ्गीकारे अतिप्रसंगदोषः अश्लेषविनाशश्रुतिविरोधश्च संभवति? उत नेति । तदर्थम् वात्सल्यस्य पूर्वाघविषयत्वम्, अश्लेषविनाशश्रुतेः प्रपन्नविषये सङ्कोचकप्रमाणान्तरं च नास्ति, उतास्तीति ॥

यदा नास्ति ; तदा पूर्वाघस्य वात्सल्यविषयत्वाभावादतिप्रसंगः, अश्लेषविनाशश्रुतेस्सङ्कोचकाभावेन तद्विरोधश्चास्तीति, दुष्टगुणहीनचेतनाङ्गीकारानुपपत्तेः, अर्जुनस्य दोषगुणहान्योरभावेन त्वाशब्दस्य विद्यारहितदुष्टचेतनोपस्थापकत्वाभावात्, चरमश्लोके निरपेक्षत्वस्वभावासिद्धेः मन्त्रे निरपेक्षोपायत्वप्रतीतिसिद्धिरिति पूर्वपक्षे फलफलिभावः ॥

यदा च वात्सल्यस्य पूर्वाघविषयत्वं संभवति; यदा चाश्लेषविनाशश्रुतेः प्रपन्नविषयेऽमुख्यत्वकल्पनम्, प्रमाणान्तरं चास्ति, तदा, अतिप्रसंगश्रुतिबाधयोरभावेन दोषदुष्टविद्याहीनचेतनाङ्गीकारोपपत्तेः अर्जुनस्य दोषगुणहानिसंभवाच्च त्वाशब्दस्य दुष्टगुणहीनचेतनोपस्थापकतया चरमश्लोके भगवतो निरपेक्षोपायत्वस्वभावोऽवगन्तुं शक्यते इति तदुपबृंह्ये मन्त्रेऽपि तत्सिद्धिरिति राद्धान्ते फलफलिभावः ॥

पूर्वपक्षस्तु, यदि वरणमधिकारिविशेषणं स्यात्; तदास्य विद्याहीनत्वं स्यात् । तदभावेन च प्रारब्धेतराखिलपूर्वपापानां सत्वात् * मोक्षयिष्यामि * इत्युक्तभगवदङ्गीकारविषयत्वं व्याहन्येत । प्रत्युत, दोषगुणहान्योस्सत्त्वात् * क्षिपामि * इति संकल्पविषयत्वावहत्वमेव स्यात् । वरणस्य उपायत्वे तु विद्याधिगमसत्त्वेनोत्तरपूर्वाघयोरश्लेषविनाशविषयः * मोक्षयिष्यामि * इति संकल्प उपपद्यते । अन्यथा * एवं विदि पापं कर्म न श्लिष्यते * एवं हास्य सर्वे पाप्मानः प्रदूयन्ते * तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् * इति श्रुतिसूत्रयोः विद्याधिगमस्य मोक्षणार्थाङ्गीकारहेतुत्वावगमेन तद्बाधो दुर्वारः ॥

किं च वरणस्याधिकारिविशेषणत्वेन विद्यात्वाभावे * अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरम् * इत्यादि प्रतिपन्नं विधूननमपि शरणागतस्य न सिद्ध्येत् । अत्र विद्या-

प्रारम्भाभावेन तन्निष्पत्त्यभावत्, तस्य च प्रारब्धविद्यानिष्पत्त्यनन्तरभावित्वाच्च । एवम्, विधूननानन्तरभाव्युपायनं च न स्यात् * तस्य प्रिया ज्ञातयस्सुकृतमुपयन्ति, अप्रिया दुष्कृतम् * इति प्रतिपन्नस्य विद्यामाहात्म्यकृतत्वात् । पूर्वोत्तरनाशप्रतिबन्धधूननोपायनहेतुर्विद्यामहात्म्यम् * इति श्रुतप्रकाशिका न चायं नियम उपासकमात्रविषय इति वाच्यम् । * विद्याप्राप्तिशब्दस्साधारण्येन प्रपदननिष्पत्तेरपि द्योतकः * इति श्रुतप्रकाशिकाकारवचनात् । अन्यथोत्क्रान्तिगतिफलक्रमविशेषाणामप्युपासकमात्रविषयत्वप्रसंगः । अतः शरणागतेरुपायत्वेन विद्यात्व-मकामेनापि स्वीकार्यम् ॥

किंच शरणवरणस्य विद्यात्वाभावे अनादिकालोपचितानन्तपापानां तदवस्थत्वे न तादृशचेतनाङ्गीकारे सर्वेषामपि तादृशानां भगवदङ्गीकारप्रसङ्गः । न च प्रातिकूल्यव्यवसायनिवृत्तानां पापं न भगवदङ्गीकारप्रतिबन्धक-मिति वाच्यम् । उपासकानामपि तावन्मात्रेणाङ्गीकारसंभवेनोपासनानुष्ठानवयर्थ्यात् । न चाधिकारि-विशेषणत्वेन शरणागतेरनुष्ठानमतिप्रसंगवारकमिति वाच्यम् । तस्याः कालुष्यशामकत्वे, आगतोऽसिमन्मार्गे ; तच्छामकत्वाभावे कालुष्ये सति कथमङ्गीकारस्सेत्स्यति । अतोऽतिप्रसङ्गो दुर्वारः । न च, शरणागतपापानां वात्सल्यविषयत्वात् भगवदङ्गीकारसंभवः । तस्योक्तराघविषयत्वात् । वात्सल्यं च दोषादर्शित्वम् । तच्चाश्लेषश्रुत्यर्थ एव । न चास्य तत्संभवः । विद्यारम्भाभावेन तदुत्तराघानामप्यभावात् । उत्तराघेऽप्य-बुद्धिपूर्वको वात्सल्यविषयः * बुद्धिपूर्वकस्य तस्य प्रपत्त्या यत्पुनश्शरणं व्रजेत् * इति निष्कृतिवचनात् । यदि च, वात्सल्यं दोषभोग्यत्वम्, तच्च पूर्वाघविषयं च भवतीत्युच्यते ; तदा तद्भोगसिद्धये बुद्धिपूर्वकमेव तत्करणा-पत्तिः ; तस्य बुद्धिपूर्वाघविषयत्ववत् तत्पूर्वकोत्तराघविषयत्वे प्रायश्चित्तविधानानुपपत्तिश्च ॥

किंचाधिकारिविशेषणत्वेनाभिमतशरणवरणस्य पापानां वात्सल्यविषयत्वप्रयोजकत्वे सर्वहेतुकत्ववादापत्तिः । तदप्रयोजकत्वेऽतिप्रसङ्गोऽत्रापि समानः । न च, त्वाशब्दस्य विद्याहीनदुष्टचेतनोपस्थापकत्वम्, समर्पितभरस्य । अत एव अदुष्टस्य चेतनस्योपस्थापनात् ; जितेन्द्रियप्रधानस्यास्तिकाग्रेसरस्य, केशवस्यात्मेति कृष्णस्य धारकत्वेन श्रुतस्यार्जुनस्य दोषासंभवेन त्वाशब्दस्यतद्विशिष्टोपस्थापकत्वासंभवाच्च । तस्मात् पापानां वात्सल्यविषयत्वे क्षमाविषयत्वे वा शरणागतिः प्रयोजिकेति तस्याधिकारिविशेषणत्ववादो निर्णिबन्धन इति ॥

अत्रोच्यते ;

(पुरुषकारत्तुक्कुमुपायत्तुक्कुम वैभवमावदु—दोषत्तैयुम् गुणहानियैयुम् पार्त्तु उपेक्षियादवळवन्रिक्के अङ्गीकारत्तुक्कु अवैतन्नैये पच्चैयाक्कुग)—

यदुक्तं शरणागतेरधिकारिविशेषणत्वे विद्यासंबन्धाभावेन प्राचीनपापसत्त्वादीश्वराङ्गीकारो नोपपद्यत इति ; तदयुक्तम् । उक्तप्रकारेण दोषगुणहान्योस्सत्त्वेऽपि न तयोः केवलमङ्गीकारप्रतिबन्धकभावः ; अपि तर्हि तद्धेतुत्वमेवेत्यर्थः ॥

अयं भावः ; यदुक्तं गुणहानावङ्गीकारे अश्लेषादिश्रुतिविरोधः, दोषसत्त्वेऽपि स्वीकारेऽतिप्रसङ्ग इति ; तन्न, प्रातिकूल्यव्यवसायप्रतिनिवृत्तविषये तयोरङ्गीकारप्रतिबन्धकत्वादर्शनात् । तथात्वं च श्रुतिस्मृतिभ्या-मवगम्यते । श्रुतिस्तावत्, तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति * इति । स्मृतिश्च * वधार्हमपि

काकुत्स्थः कृपया पर्यपालयत् * अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना * दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम् * प्रपन्नं परिगृह्णामि सदोषं चाप्यहं मुने * इत्यादि । न चात्र सर्वत्र प्रपत्तेश्श्रवणात् न केवलं प्रातिकूल्य व्यवसायनिवृत्तिरिति वाच्यम्; तच्छ्रवणेऽपि तस्या अकिंचित्करत्वात् । प्रातिकूल्यनिवृत्तौ सत्यां शरण्यगुणानामेव हि स्वीकारप्रयोजकत्वम् । अत एव * क्षाम्यस्यहो तदभिसन्धिविनाश (राम) मात्रात् * इत्याद्युक्तिः । दयायास्तु, * प्राचीनासंख्येयजन्मसु महापराधकारिणि पश्चात्तनप्रातिकूल्यव्यवसायनिवृत्तिमात्रेण तदपराधाननन्ताननादृत्य तस्य निरतिशयसंपत्प्रदानाय स्वयमेव भगवान् प्रयतत इति सावकाशत्वम् । * इति श्रुतप्रकाशिका । * कृपया पर्यपालयत् * रक्षितव्यः कृतात्मना * सतामेतदगर्हितम् * इत्यादिना शरण्यगुणानां प्रयोजकत्वं हि श्रूयते । अत एव किरातादिषु प्रपत्त्यनुष्ठानाभावेऽपि तादात्विकप्रातिकूल्यनिवृत्तिमात्रमेव हि स्वीकारहेतुर्दृष्टः, अन्यथा, प्रपत्तेरङ्गीकारहेतुत्वे कृपादिगुणानामनवकाश एव स्यात् ॥

किंच * अपि वध्यम् * इत्यादौ प्रपत्तेरदोषनाशकत्वादविद्यात्वमेव प्रतीयते । न तावदिदं वाक्यं प्रपत्तिविधायकम्, * प्रपन्नं न परित्यजेत् * इति विधेः परित्यागनिषेधविषयत्वात् । प्रमाणान्तरसिद्धप्रपत्त्युपजीवनेन हि अयं निषेधविधिः । अप्राप्तस्य निषेधायोगात् * अपि वध्यम् * इति त्यागः प्राप्तिं सूचयति । ततश्चात्र वध्यताप्रपत्त्योरेकाधिकरणे समानकालीनत्वश्रवणात् प्रपत्तेर्दोषनाशकत्वं प्रतीयते । न च पूर्वम् वध्यम्, इदानीं प्रपन्नमिति योजना । अध्याहारापत्तेः । पूर्वस्मिन् काले वध्यस्येदानीं त्यागप्रसंगाभावेन तन्निषेधविधानायोगात् । त्यागात्यागहेतुद्वयसमुच्चये, अत्यागहेतुप्राबल्यं हि विध्यभिप्रायः । एवम्, प्रपत्तेः फलप्राप्तिप्रतिबन्धकनाशकत्वादर्शनात्; शरण्यगुण एव तत्र तत्र स्वीकारहेतुः ॥

न च, * एवं विदि पापं कर्म न श्लिष्यते * इत्यत्र विच्छब्देन प्रपन्नस्यापि विवक्षितत्वात् एतद्विरोधेनापि * वध्यम् * इति श्रुतिरन्यथानेयेति वाच्यम् । सावकाशनिरवकाशन्यायेन सावकाशाश्लेषश्रुतेरेवान्यथा वर्णनीयत्वात् । अन्यथा * वध्यं प्रपन्नम् * इति प्रपत्तेः पापनाशकत्वाभावश्रुतिः स्वरूपेणैव बाधिता स्यात् । अतः अश्लेषादिश्रुतिः प्रपत्त्यंशे नियतपूर्वभावित्वमात्रविषया । प्रातिकूल्यनिवृत्तिमात्रसापेक्षशरण्यगुणेन स्वीकारस्यान्यथासिद्धत्वात् । यद्वा, प्रातिकूल्यव्यवसायनिवृत्तिमारभ्य * एष ह्येव साधु कर्म कारयति * इति शरणवरणस्येश्वरव्यापारत्वात् ईश्वरसाध्यत्वाभिप्रायेण वा * एवं विदि * इति प्रपत्तेस्साधनत्वनिर्देशः । ततश्च चेतनगतप्रपत्तेरप्रयोजकत्वम् * अपि वध्यम् * इत्यादिसूच्यत इति न श्रुत्योः परस्परविरोधः ॥

पूर्वस्मिन्नधिकारे प्रपत्तेः * क्षमिष्यामि इति संकल्पहेतुत्वेऽपि * क्षान्तम् इति संकल्पहेतुत्वाभावात् न मोक्षहेतुत्वमित्युक्तम् । अत्र * मोक्षयिष्यामि, इत्यत्रापि अन्यथासिद्धत्वादहेतुत्वमिति निर्हेतुकत्वं निष्कृष्यते । एवं प्रपत्तेः कालुष्यनिवर्तकत्वेन स्वीकारहेतुत्वाभावात् अत्र कालुष्यनिवर्तकत्वेन वात्सल्याद्युद्बोधनं पुरुषकारेण क्रियते । पुरुषकारेण वात्सल्याद्युद्बोधे सति उद्बुद्धवात्सल्यविषयतया अनुकूलवेदनीयेषु प्रपन्नपापेषु सत्सु नैषां फलं दास्यामीति यथार्थागर्भमीश्वरसंकल्पं करोतीति । अत एव नोपासकेऽतिप्रसङ्गः । तत्रपुरुषकाराभावात् ॥

न चाश्रितदोषस्य भोग्यत्वे प्रपन्नेन पुनरनुष्ठानप्रसङ्गः । * लंङ्घयन् शूलमारोहेत् * इति निषेधविधिपर्यालोचनया ततो निवृत्त्युपपत्तेः । दोषादर्शित्वपक्षेऽप्ययं प्रसङ्गस्समानः । कामान्निश्शङ्क यथेष्टप्रवृत्तौ

निवारकाभावात् । न च, * आश्रितवात्सल्यैकजलधे * इत्यादिप्रमाणसत्त्वात्तस्योत्तराघविषयत्वम् । उत्तराघाश्लेषस्य विद्याफलत्वेन वात्सल्यकृतत्वाभावात् । अश्लेषविनाशयोरदर्शनविस्मरणयोर्विद्याकार्यत्वेन पूर्वोत्तराघयोरनुकूलतया प्रतीतिरेव वात्सल्यफलम् । अन्यथा निर्विषयतापत्तेः । * आश्रितवात्सल्यैक-जलधे * इत्याद्यपि तत्पापमात्रस्यासङ्कोचाद्वात्सल्यविषयतां वदति ॥

न च दोषभोग्यत्वे प्रमाणाभावः * स्तन्यं तद्विषसंमिश्रं रस्यमासीज्जगद्गुरोः * प्रपन्नं परिगृह्णामि सदोषं चाप्यहं मुने * अद्य जातं तु मलिनं वत्सं गौरिव धावति * इत्यादिसत्त्वात् । अतः संश्रितसकलपापं तद्देहादिकमपि वात्सल्यविषयम् । एवम्, भगवत्प्रीतिविषयाण्यपि कर्माणि चतुर्विंशतितत्त्वात्मकप्रकृतिनाशवत् प्राप्तिसमये एतदधिकारिप्रार्थनानुरोधेन विधूननपूर्वकं प्रियाप्रियगतानि क्रियन्ते ॥

ननु, उपासनसमाप्त्यनन्तरभाविनो विधूननस्य कथमत्र संभवः । विद्याया असत्त्वादिति चेत्; न । प्रपत्तिसाधनत्ववादेऽपि तस्यास्सकृत्त्वेन दर्शनपर्यन्तविद्यासमाप्त्यसंभवचोदनायास्तुल्यत्वात् । तत्पक्षे प्रपत्तिरङ्गि-विद्या–अस्मत्पक्षे साऽङ्गविद्येति वैषम्यमेव । तन्मते चेतनारब्धां प्रपत्तिविद्यां निदिध्यासनत्वाद्यवस्थामनापन्नामपि प्राप्तिविषये सकृदेव दर्शनाकारां करोति; अस्माकं तु प्रयोजयितृभगवद्व्यापाररूपां प्रपत्तिमन्तकाले स्वयमेव तादृशावस्थापन्नां करोति । तदुक्तम्, * अङ्कोलतैलसिक्तानां बीजानामचिराद्यथा । विपाकः फलपर्यन्त-स्तथात्रेति व्यवस्थितिः * इति । सात्वते च * दुष्टेन्द्रियवशाच्चित्तं नृणां यत्कलुषैर्वृतम् । तदन्तकाले संसिद्धिं याति नारायणालये * इति ॥

संग्रहश्च ;

नन्वस्याश्शरणागत्यास्त्वहेतुत्वं यदीष्यते । एवमेवं विदीत्युक्तपापहानिर्न सेत्स्यति ॥
मैवमस्या अविद्यात्वेऽपीशवात्सल्यवैभवात् । पूर्वोत्तराघयोर्नाशः प्रपन्नस्य भविष्यति ॥
'अपि वध्यं प्रपन्नं न प्रयच्छन्ती' ति च श्रुतेः । दोषो यद्यपि तस्य स्यात्सद्वधाहमिति च स्मृतेः ॥
अस्मादेवंविदीत्येतत्फलं विद्यामपीस्ययेत् । यो 'ब्रह्मवेद ब्रह्मैव भवतीति' नयेन च ॥
अतः पुरुषकारोत्थवात्सल्यादिगुणो विभुः । प्रपन्नस्याघमखिलं गुणत्वेनैव मन्यते ॥
तस्मादुपासकेनैव वात्सल्यस्य प्रयोजनम् । न स्वैरता प्रपन्नस्य निषेधविधिसंभवात् ॥

यदुक्तमर्जुनस्य दोषासंभवात् न त्वाशब्देन दोषदुष्टचेतनोपस्थापनसंभव इति ; तदनूद्य परिहरति (जितेन्द्रियेत्यादि) * पाठक्रमादर्थक्रमो बलीयान् * इति तद्वाक्यमेतदधिकारसङ्गतं वेदितव्यम् ॥

इति प्रपन्नस्वरूपनिरूपणाधिकारः ॥१३॥

॥१४॥ अथ, प्रपत्तव्यगुणनिरूपणाधिकारः ॥

(इरण्डुमिरण्डुम् कुलैयवेणुमेन्निरुक्किलिरण्डुक्कुमिरण्डुमुण्डायुत्तदाम्)

गुणहीनदुष्टचेतनाङ्गीकारे सत्यसंकल्पादिगुणहानिस्स्यादिति पूर्वोक्ताक्षेपात् संगतिः ॥

पूर्वाधिकरणे वरणस्यासाधनत्वेन केवलमधिकारिविशेषणत्वे * मोक्षयिष्यामिपदोक्तस्वीकारानुपपत्तिरित्याशङ्क्य * अपि वध्यं प्रपन्नम् * इत्यादि प्रमाणानुरोधेन त्वाशब्दस्य दोषदुष्टप्रपन्नोपस्थापकतया प्रपत्तेरविद्यात्वम् अत एवेश्वरस्य गुणहीनदुष्टचेतनाङ्गीकारस्वभावत्वं चावगम्यत इत्युक्तम् । तर्हि, तत एवेश्वरस्वभावात् अहंशब्दसूचितात्सत्यसङ्कल्पत्वात् विद्याविहीनदोषदुष्टपुरुषाङ्गीकारो न घटत इत्याशङ्क्य, मांशब्दसूचितसुशीलत्वादिस्वभावपर्यालोचनयाऽस्मिन्नधिकरणे वरणस्य केवलमधिकारिविशेषणत्वमेव । न तु विद्यात्वमिति स्थाप्यते ॥

संशयस्तु, मन्त्रे भगवदुपायत्वस्य निर्हेतुकत्वप्रतिपत्तिर्नास्ति, उतास्तीति । तदर्थम्, तदुपबृंहणे चरमश्लोके ईश्वरस्य निरपेक्षत्वस्वभावोऽवगन्तुं न शक्यते उत शक्यते इति । तदर्थम्, वरणं साधनम्, उताधिकारिविशेषणमिति । तदर्थम्, अहंशब्दोपस्थापितसत्यसंकल्पत्वादेरसंकोचस्स्वीकार्यः ? उत सङ्कोच इति । तदर्थम् असंकोचस्वीकारे मांशब्दोपस्थापितवात्सल्यादीनामवकाशोऽस्ति, उत नास्तीति । यदाऽस्ति; तदा अहंशब्दोक्तसत्यसंकल्पत्वस्यासंकोचे बाधकाभावात् वरणस्य साधनतया निरपेक्षत्वस्वभावस्योपबृंहणे अप्रतीतेरुपायत्वं सहेतुकमिति पूर्वपक्षे फलति ॥

यदा, सत्यसङ्कल्पत्वस्यासङ्कोचस्वीकारे वात्सल्यादीनामवकाशो नास्ति; तदा, अहंशब्दोक्तसत्यसङ्कल्पत्वस्य संकोचात् वरणस्याधिकारिविशेषणत्वेन गुणहीनदुष्टपुरुषाङ्गीकारस्वभावत्वमवगन्तुं शक्यते इति निर्हेतुकोपायत्वसिद्धिरिति सिद्धान्ते फलति ॥

पूर्वपक्षस्तु, यदि पापानामालयं शास्त्रविहितोपायमात्रशून्यं चेतनं पुरुषकारबलोद्भावितस्वातन्त्र्येण तदुद्भावितवात्सल्यविषयं कृत्वेश्वरोऽङ्गीकुर्यात्; तदा, तस्य दोषगुणहान्योरापत्तिः । प्रथमं दण्ड्यादण्डिन ईश्वरत्वभङ्गः । * क्षिपामि * इति सङ्कल्पहानिः । दोषस्यादृतत्वात् । * यद्यदाचरति श्रेष्ठः * इति न्यायेन सर्वेषामपि तत्र प्रवृत्तौ सर्वनाशकत्ववैषम्यनैर्घृण्ययोरापत्तिः । दोषस्याभीष्टफलप्रदत्वौपयिकत्वे चतुर्विधपुरुषार्थार्थिभिरपि तत्र प्रवृत्तौ तेषामनिष्टफलदाने च वञ्चकत्वादार्जवविश्वसनीयत्वादिभङ्गापत्तिः । शास्त्रमर्यादाभञ्जनात्सत्यसङ्कल्पत्वहानिश्च । उपायाभावेऽपि तत्फलप्रदत्वे * प्राप्योऽहं नान्यथा प्राप्यः * इत्युक्तसत्यसङ्कल्पहानिः, वैषम्यापत्तिश्च । एवम्, क्वचिदहेतुकफलप्रदत्वे क्वचिद्दुःखफलप्रदत्वमपि स्यात् । असत्यसंकल्पस्य नियततापत्तिश्च । न चोक्तसर्वदोषपरिहारः प्रपत्तेरधिकारिविशेषणत्वाभ्युपगमाद्भवतीति वाच्यम् । वरणस्य चेतनमतिपूर्वकत्वेन चेतनगतत्वे, तस्य चानिष्टनिवृत्तिपूर्वकेष्टप्राप्तिप्रयोजकत्वे, तथात्वस्य चानादिसङ्कल्पसिद्धत्वे अस्मदुक्ताशक्ताधिकारप्रपत्त्यन्तर्भाव एवेति तस्याधिकारिविशेषणत्वकथनमनर्थकम् । तस्य भगवन्मतिपूर्वकत्वेन भगवदीयत्वे, विद्यासमाप्तिरिव तत्प्रारम्भरूपप्रपत्तेरपीश्वरकृत्यत्वेन चेतनगतत्वाभावादतिप्रसंगवारकत्वमपि न स्यात् । चेतनबुद्धिपूर्वकत्वे परं चेतनगतत्वम् । अतोऽतिप्रसंगादिकं न स्यादेव ॥

ननु, क्षिपामि इत्यादिसङ्कल्पस्य प्रातिकूल्यव्यवसितविषयत्वात् * प्राप्योऽहं नान्यथा प्राप्यः * नान्यः पन्थाः * इत्यादिसङ्कल्पस्य स्वतन्त्रचेतनविषयत्वाच्च, अभिमुखपरतन्त्रचेतने पुरुषकारवशाद्भगवतो रक्षकत्वे

शास्त्रमर्यादा, भगवतो वात्सल्यादिगुणजातं च संरक्षितं भवेदिति चेत्, न । अभिमुखपरतन्त्रसंरक्षण-सङ्कल्पस्यैच्छिकत्वे अनादिकृतमर्यादाभङ्गेनासत्यसङ्कल्पता । तत्सङ्कल्पस्याप्यनादित्वे, तत्राप्याभिमुख्यपारतन्त्र्य-ज्ञानयोश्चेतनमतिपूर्वकत्वे भक्तिप्रपत्त्योरिव तयोरपि हेतुत्वात्सहेतुता । ईश्वरमतिपूर्वकत्वे चेतनगतत्वाभावे-नातिप्रसङ्गादिवारकत्वमपि न सिद्ध्येत् ॥

अतः, सत्यसङ्कल्पत्वादिवाचकाहंशब्दान्वयवैघट्यान्न वरणस्याधिकारिविशेषणत्वम् । अतः, शास्त्रमर्यादासिद्ध्यर्थम् ईश्वरस्येश्वरत्वादिसिद्ध्यर्थं च वरणस्य साधनत्वमभ्युपेत्यम् । एवं सति * नान्यः पन्थाः * इति भक्तिप्रपत्तिव्यतिरिक्तसिद्धसाध्यरूपसमस्तोपायान्तरनिषेधपरः, स्वतः प्राप्तसङ्कोचे बाधकाभावात् । उक्तातिप्रसङ्गादेव सिद्धोपायविधीनामपि साध्योपायविशिष्टपरत्वमिति न केवलं सिद्धोपायविधिसंभवः ॥

न चैवं सर्वत्र सापेक्षत्वे मांशब्दोपस्थापितवात्सल्यादिगुणहान्यापत्तिरिति वाच्यम्; वात्सल्यस्य * दोषो यद्यपि तस्य स्यात् * इत्युक्तप्रकारेणाश्रितदोषादर्शनेनाङ्गीकारहेतुत्वात्; सौशील्यस्य विश्वसनीयताहेतुत्वात्; सौलभ्यस्य दुष्प्रापताशङ्कावारकत्वात्; सार्वज्ञस्येष्टप्राप्त्यनिष्टनिवृत्तिपर्यालोचनाहेतुत्वात्' परमकारुणिकत्वस्य * मित्रभावेन संप्राप्तम् * * यदि वा रावणस्स्वयम् * इत्युक्तप्रकारेणानन्तापराधिनोऽपि केन चिद्व्याजमात्रेण रक्षणोपयोगित्वात्; कृपायाश्च, चेतनसत्तास्थित्योस्तदनुवर्तने, नित्यानुभवे, मुक्तानावृत्तौ, सामान्यसृष्ट्यादौ, स्वावतारे, शास्त्रप्रवर्तने, मोक्षश्रद्धायाम्, सुकृतविशेषे, निग्रहशमनोपायप्रदाने, उपायान्तरङ्गभावे, उपायान्तर-स्थाननिवेशे, व्याजमात्रेण संसारनिवर्तने, आर्तप्रपन्नस्य फलप्रदत्वे, बुद्धिपूर्वाघप्रायश्चित्तकल्पने, अकृत-प्रायश्चित्तानामपि यमवश्यत्वविरहेण फलाविरोधेन यत्किञ्चिदुपद्रवकल्पने च हेतुत्वात् । अत.शरणागतेर्हेतु-त्वाभ्युपगमेऽपि मांशब्दोक्तगुणानामक्षतेः वरणं नाधिकारिविशेषणमिति ॥

तत्राह;

(इरण्डुमित्यादि)

पुरुषकारोपायत्वयोः यद्यहेतुकत्वाङ्गीकारे ईश्वरत्वगुणहानेः मर्यादाभञ्जनेन दोषापत्तेश्च अङ्गीकारे दोषगुणहानिव्यतिरेकेण भाव्यमिति मन्येत; तदा, तयोः मांशब्दोक्तवात्सल्यादिगुणाभावः नैर्घृण्यादिदोषश्च स्यातामित्यर्थः ॥

अयं भावः; यदुक्तं वरणस्याधिकारिविशेषणत्वे गुणहीनदुष्टचेतनाङ्गीकारात् विधिनिषेधशास्त्रमर्यादा-भङ्गः. * क्षिपामि * नान्यः पन्थाः * इत्यादिसत्यसङ्कल्पत्वभङ्गः, ईश्वरत्वादिगुणहानिश्च स्यादिति । तदेतत्सर्वं वरणस्याधिकरिविशेषणत्वाभ्युपगमात् परिहृतम् । न च वरणस्य चेतनमतिपूर्वकत्वे च तदभावे दोषस्योक्तत्वान्न तथात्वमिति वाच्यम् । चेतनमतिपूर्वकत्वेऽपि तस्य हेतुत्वप्रसङ्गाभावात् । मुख्यगौणसाधनद्वयरहितस्यात्यन्ताकिञ्चनस्य संरक्षणार्थे परमकारुणिकेनातिप्रसङ्गवारणार्थं किञ्चिद्व्याजीकृत्यानादि-रक्षणसङ्कल्पकरणोपपत्तेः । अतः, परतन्त्राणां तदनुमत्यनुरोधेनासाधनमेव शरणं गमि(म)ति प्रसङ्गवारणाय व्याजीकृत्य रक्षणेनासत्यसङ्कल्पत्वाद्यापत्तिः । व्याजमात्रेण फलप्रदत्वसङ्कल्पस्याप्यनादित्वात् ॥

नापि सहेतुकता, अहेतुकत्वे सत्यतिप्रसङ्गवारकत्वं व्याजत्वमिति व्याजेन सहेतुकत्वशङ्काया

व्याहतत्वात् । वरणस्येश्वरमतिपूर्वकत्वेऽपि नानुपपत्तिः । तस्य प्रथमप्रवृत्तेश्वरव्यापारतया चेतनगत-फलसाधनत्वाभावेऽपि, अतिप्रसङ्गपरिहारत्वमुपपद्यते । यथा साधारणे द्रव्ये परानुमत्या राज्ञ उपायने दत्ते, प्रथमप्रवृत्तस्य तत्फलभागित्वे यदि प्रथमं प्रवृत्त औदार्यादनुमन्तुस्तत्फलं ददातीति तत्रानुमन्तुरंशे पूर्वं स्वाम्यसत्त्वात्, अनुमन्तृत्वाच्चातिप्रसङ्गः, दातुर्वैषम्यादिदोषश्च न संभवति; तथा अस्य ज्ञानचिकीर्षा-प्रयत्नानामुभयकर्तृकत्वेनोभयसाधारण्यात् मोक्षार्थप्रथमप्रवृत्तेर्यादृच्छिकादिषु सुकृतत्वकल्पनरूपाया भगवदीयतया मोक्षार्थप्रवृत्तिमात्रस्य चेतनफलसाधनत्वाभावेऽपीश्वरस्य गुणाधिक्यादनुमन्तुश्चेतनस्याननुमन्तृत्वादिवैषम्यात् तस्य फलानन्वये स्वस्य फलित्वासंभवाच्च तत्फलं ददाति चेत्; कोऽत्रातिप्रसङ्गादिदोषः । कथं वा तस्य सर्वसमत्वहानिः कथं वा सहेतुकत्वशङ्कावकाशः । कथं वा चेतनस्य फलानन्वयप्रसक्तिश्चेति । अतो वरणस्याहेतुत्वेऽप्यतिप्रसङ्गादिदोषपरिहारसमर्थत्वान्न किञ्चिदपहीनम् ॥

यत एवमतिप्रसङ्गादिदोषाभावः, तत एव सिद्धोपायविधीनां साध्योपायनैरपेक्ष्येण स्वतन्त्रत्वात् * नान्यः पन्थाः * इत्यादिविधेस्सिद्धोपायातिरिक्तविषयत्वेन सङ्कोचस्सिद्ध्यति । * नान्यथा प्राप्यः * इति संकल्पोऽपि स्वतन्त्रचेतनविषय इति सेत्स्यति । * क्षिपामि * इति सङ्कल्पोऽपि न विद्याहीनमात्रविषयः । अपि तु तद्धीनप्रातिकूल्यव्यवसितविषयः । अतः अहंशब्दोपस्थापितसत्यसङ्कल्पत्वादेः, शास्त्रमर्यादास्थापकत्वादेश्च न विरोधः ॥

यदि शरणवरणमपि साधनमभ्युपगम्यते; तदा सर्वत्र सहेतुकत्वेन मांशब्दोपस्थापितवात्सल्यादिगुणाना-मनवकाशेनासिद्धिरेव स्यात् । न च वात्सल्यस्याश्रितदोषादर्शनेनाङ्गीकारहेतुत्वम् । साधनपक्षे — आश्रयणविरोधिपापानां पञ्चसंस्कारदीक्षाविधानादिना आत्मज्ञानेन च नष्टत्वात् तत्प्राप्तिप्रतिबन्धकानां विद्याधिगमेन नष्टत्वाच्च दर्शनीयपापाभावात् । सौशील्यमपि न विश्वसनीयताहेतुः भक्तस्येव विश्वाससंभवात् । सर्वे-तपसामतिरिक्तत्वप्रमाणेन ततोऽपि महाविश्वाससम्भवाच्च । दुष्प्रापत्वशङ्काऽपि * नार्हन्ति शरणस्थस्य * इत्युक्तस्य न सम्भवतीति सौलभ्यमप्यफलम् । सर्वज्ञत्वस्यानिष्टनिवर्तनाद्युपयुक्तत्वेऽपि अत्र विशिष्य वेद्यत्वे प्रयोजनाधिक्याभावात् अघटितघटनासामर्थ्यस्य वेद्यत्वाभावेऽपि भक्तस्येव नित्यसूरिसङ्घे स्थापनसम्भवात् ज्ञानशक्तयोश्च वैफल्यम् । स्वामित्वस्य * देहि मे ददामि ते * इति प्रकारेण इन्द्रादेरिव संबन्धाभावेऽपि फलप्रदत्वसंभवे अत्र वेद्यत्वविधानानुपपत्तिः । कारुण्यस्यापि * अतिरिक्तं तपः श्रुतम् * इति श्रुतस्य कौस्तुभादप्युत्कृष्टात्मसमर्पणस्य फल्गुत्वेन व्याजमात्रत्वायोगात् न फलदानौपयिकत्वमिति निष्फलत्वम् । चेतनसत्तास्थित्यनुवर्तनमुक्तानावृत्तिनित्यानुभवमहदादिसामान्यसृष्ट्यवतारादीनां कृपाकार्यत्वेऽपि अत्र विशिष्य वेद्यत्वे प्रयोजनाभावात्; अन्यथा उपासनेऽपि वेद्यत्वापत्तेः । तद्वेद्यत्वविधिर्व्यर्थ एव स्यात् । ततश्चाहेतुकमेव क्वचिद्रक्षकत्वाभावे वात्सल्यादिगुणानां तदुद्बोधकपुरुषकारस्य च विषयाभावादभावपर्यवसानं स्यात् । तत्प्रतिपादकशास्त्राणामप्रामाण्यं च स्यात् । एवं सर्वत्र व्याजत्वेऽपि प्रधानहेतुस्सहजकारुण्यादिकमिति चेत्; तर्हि स्वर्गादिप्रदत्वमपि तथा स्यात् । यागादेः फलसदृशत्वात् न तत्र कृपाया अवकाशः । मोक्षसाधनानां विसदृशत्वाद्विसदृशसाधनस्य निरतिशयफलप्रदत्वं दयादिकार्यमिति चेत्; तर्हि, भक्तावपि वात्सल्यादे-रुपास्यतापत्तिः । यदि मुख्यसाधनफलस्य गौणसाधननिष्ठस्यापि प्रदाने दयाद्यपेक्षा, तदा, गौणकर्म-

स्वष्टकादिश्राद्धादिषु सर्वत्राराध्यदेवतागुणानुसन्धानस्याप्यङ्गत्वप्रसङ्गः । दयायाः प्रातिकूल्यव्यवसायनिवृत्तिमात्र-विषयत्वप्रतिपादकश्रुतप्रकाशिकावाक्यविरोधश्च । क्वचिदहेतुकमेव रक्षणे परं कृपायास्सहजत्वं सिद्ध्यति । तथात्वे क्वचित्सिद्धे हि शास्त्रविहितहेतूनां व्याजत्वसिद्धिश्च ॥

किं च "माम्" इत्यत्रार्जुनसारथ्यवेषस्योपास्यगुणत्वेन विधानात्तत्पारतन्त्र्यस्य स्वातन्त्र्यकाष्ठारूपत्वात् स्वातन्त्र्यस्यापि वेद्याकारत्वमिति वाच्यम् । न च * संसरणे भगवत्स्वातन्त्र्यं प्रधानहेतुः कर्मादिकं सहकारि * इति वेदान्ताचार्यैरुक्तमिति वाच्यम् । * त्राणे स्वामित्वमौचित्यं न्यासाद्यास्सहकारिणः । प्रधानहेतुस्स्वातन्त्र्य-विशिष्टा करुणा विभोः ॥ * इति तैरेवोक्तत्वात् ततश्च तस्य वेद्यत्वं वरणोपायत्वेन सिद्ध्यति । न च न्यासादिव्याजमात्रनिष्ठस्यानन्तस्थिरफलप्रदत्वं स्वातन्त्र्यकृत्यमिति वाच्यम् । क्षणार्धकृतपापस्य कल्पकोटि-नियतानुभवेप्यनाश्यदुःखप्रदत्वेऽपि तस्य साधारण्यात् । अकल्याणगुणत्वाच्च रक्षणे न्यासापेक्षत्वेन कर्मपारतन्त्र्यमेवास्तीति कुतश्च स्वातन्त्र्यम् । ततश्च क्वचिदहेतुकत्वे (नं) रक्षणे स्वातन्त्र्यसिद्धिः, तस्य कल्याणत्वसिद्धिश्च ॥

यद्यपि कर्मव्यवस्थायाः स्वातन्त्र्यकृतत्वात्तदनुगुणफलप्रदत्वमपि तत्कार्यम् । तथाऽपि, तस्य सुखदुःखसाधारण्यान्न कल्याणगुणत्वसिद्धिः । अतः * केवलं स्वेच्छयैवाहं प्रेक्षे कंचित्कदाचन * इत्युक्त-प्रकारेण स्वकृतमर्यादातिलङ्घनेन क्वचिद्रक्षकत्वे तस्य तथात्वं सिद्ध्येत् । एवम्, ज्ञानशक्त्यादीनां शिक्षारक्षोभयसाधारणानां क्वचिदहेतुकरक्षकत्वोपयुक्तत्वं स्वाभाविकम् । अन्यत्र दुःखप्रदत्वौपयिकत्व-मौपाधिकमितीश्वरस्य कल्याणगुणस्वभावत्वं सिद्ध्येत् । अत ईश्वरस्य तद्गुणानां लक्ष्म्याश्च रक्षकत्वं स्वभाविकम्, शिक्षकत्वमौपाधिकमित्येतत् क्वचिन्निरुपाधिकरक्षकत्वे सिद्ध्यति । एवम् चेश्वरतद्गुणानां शिक्षारक्षयोरुपाधिसापेक्षत्वे तयोस्तन्निरपेक्षत्वे शिक्षाया निरुपाधिकत्वे, रक्षायास्सोपाधिकत्वे च कल्याणत्वं न सिद्ध्यतीति तत्सिद्ध्यर्थं शिक्षायामुपाधिसापेक्षत्वम्, रक्षयास्तन्निरपेक्षत्वं च वाच्यम्; तदा च रक्षकत्वमेव स्वाभावः, शिक्षकत्वमौपाधिकम् । क्वचिद्रक्षणे उपाधिदर्शनं चेतनस्वभावकृतम्; तत्स्वभावश्च कर्तृत्व-लक्षणस्वातन्त्र्यम्, सोपाधिकरक्षकत्वभ्रमश्च । तद्रहितेषु तन्निरुपाधिकरक्षकत्वं नित्येष्विव प्रवहिष्यतीति निरुपाधिकत्वमेव भगवतस्तत्त्वम् । तदुक्तम् * उपायोपेयत्वे तदिह तव तत्त्वं न तु गुणौ * इति । अतः शरणवरणस्याधिकारिविशेषणत्वे अहशब्दस्य बाधकत्वाभावात् प्रत्युत, साधनत्वे मांशब्दस्य बाधकत्वाच्च । वरणमधिकारिविशेषणम् । तस्मात् चरमश्लोकस्य भगवन्निरपेक्षस्वभावत्वावगमकत्वान्मन्त्र निरपेक्षत्व-सिद्धिरिति ॥

अयमत्र संग्रहः ;

गुणहीनस्य दुष्टस्य स्वीकारे स तथा भवेत् । ददामि न क्षमामीति सङ्कल्पस्य तथा विभोः ॥
वैषम्यादिप्रसङ्गश्च मर्यादायाश्च भञ्जनम् । अतो विद्याविनष्टाघ चेतनं स्वीकरोति हि ॥
इत्येतच्च विभोर्दोषगुणहानिप्रसक्तितः । यदि कुत्राप्यहेतुत्वं त्राणे नाभ्युपगम्यते ॥
विभोः कारुण्यवात्सल्य सौशील्याद्या महागुणाः । असत्कल्पा भवेयुस्ते विषयालाभतः परम् ॥

कृतप्रतिकृते लोके गुणत्वं नैव दृश्यते । दुष्टदुःखिपरित्यागे निर्घृणत्वादिकं भवेत् ॥
अङ्गीकारे सदोषाणां वैषम्यादिप्रसञ्जनम् । श्रयद्विशेषणीभूतप्रपत्त्यैव निवारितम् ॥
यद्यप्यहेतुककृपाफलमेषां श्रियःपतेः । तथाऽप्यत्रानुमन्तृत्वाच्चेतनस्य च तद्गता ॥
सङ्कल्पासत्यतादेश्च परिहारतया मता ॥

इति द्वितीयप्रकरणे प्रपत्तव्यगुणनिरूपणाधिकारः ॥ १४ ॥

॥ १५ ॥ अथ शोकनिवृत्तिकारणचिन्ताधिकारः ॥

इरण्डुम् कुलैन्ददेत्रिरुक्किलित्तलैक्किरण्डुमुण्डायुत्तताम् ।

यदि, मांशब्दविहितवात्सल्यादिगुणानुपपत्त्या वरणस्यासाधनत्वम् । तर्हि * मा शुचः * इति शब्देन कृतकृत्यत्वविधानानुपपत्त्या हेतुत्वसिद्धिः किं न स्यादिति शङ्कया संगतिः ॥

संशयस्तु, मन्त्ररत्ने उपायत्वस्य निर्हेतुकत्वप्रतिपत्तिर्नास्ति, उतास्तीति । तदर्थम् तदुपबृंहणे चरमश्लोके * मोक्षयिष्यामि * इति भगवतः स्वीकृतभरत्वं भरसमर्पणस्यानुपायतां नावगमयति, उतावगमयतीति । तदर्थम् * मा शुचः * इत्यत्र शोकनिवृत्तिहेतुत्वेनोपायांशे कृतकृत्यत्वमभिप्रेतम्, उत चेतनस्य स्वप्रवृत्त्यनर्हत्वम्, ईश्वरस्य तत्कार्याधिकृतत्वं च हेतुत्वेनाभिप्रेतमिति । तदर्थम्, * तस्यैवं विदुषः * इत्यादिका पुरुषविद्या, उपायांशे कृतकृत्यत्वानुसन्धानपरा, उत यज्ञाद्यनुष्ठानस्थाननिवेशेनोपासकावयवेषु अहरहस्तदङ्गानुसन्धानपरेति । तदर्थम्, कृत्योपायकृतत्वाभिप्राये या (उपायकृतकृत्यत्वाभिप्राये) उपबृंहणसाहाय्यमस्ति, उत नास्तीति । यदाऽस्ति; तदा, उपबृंहणसध्रीचीनायाः श्रुत्याः उपायांशे कृतकृत्यत्वाभिप्रायत्वात् * मा शुचः * इत्यस्यापि तदभिप्रायत्वेन वरणस्योपायतावगमकत्वात्, स्वीकृतभरत्वमनुपायतावगमकं न भवतीति, वरणस्योपायत्वान्न मन्त्रे निर्हेतुकत्वप्रतीतिः ॥

यदा च पुरुषविद्यायाः कृतकृत्यत्वपरत्वे उपबृंहणसाचिव्यं नास्ति, तदा तस्या अन्यपरत्वेन मा शुच इत्यत्र कर्तव्योपायस्य कृतकृत्यत्वाभिप्रायत्वे मानाभावात् वरणस्याधिकारिविश्वासोत्तम्भकत्वात् स्वीकृतभरत्वमनुपायत्वद्योतकं भवतीति चरमश्लोके नैरपेक्ष्यप्रतीतेः मन्त्रप्रतिपन्नमुपायत्वं निर्हेतुकमिति सिद्ध्यति ॥

पूर्वपक्षस्तु; वरणस्याधिकारिविशेषणत्वमनुपपन्नम्; समभिव्याहृतस्य * मा शुच * इत्यस्यान्वयवैघट्यात् । तत्र हि शोकनिवृत्तिहेतुत्वेन उपायांशे कृतकृत्यत्वमभिप्रेतम् । सुदुष्करोपायविधानात् शोचन्तं प्रति वरणे सकृत्त्वविधानस्य तन्निवृत्त्यपेक्षितत्वात् । एकशब्दादिना इतरनिरपेक्षत्वविधानेऽपि वरणस्यास्यावृत्तिरूपत्वेन दर्शनपर्यन्तत्वशङ्काया निवारकाभावात् ॥

न च, त्वाशब्दे स्वप्रवृत्त्यनर्हत्वस्य विवक्षिततया कर्तव्योपाये तत्रानर्हत्वात्, तत्र ममाधिकृतत्वाच्च, * मा शुचः * इति तात्पर्यं किं न स्यादिति वाच्यम् । तैत्तिरीयके प्रपत्तिविधानानन्तरम् * तस्यैवं विदुषः * इति वाक्ये पूर्वोक्ताधिकारिणः कृतकृत्यत्वविधानेनात्रापि स्थानप्रमाणेन * मा शुच * इत्यस्यापि तत्परत्वात् ।

न च, पुरुषविद्याया यज्ञादिप्रतिनिधित्वेनाङ्गतयाऽहरहरनुष्ठेयत्वात् न नैर्भर्यपरत्वमिति वाच्यम् । पूर्वानुवाके विहिताया न्यासविद्यायाः * सकृदेव हि शास्त्रार्थः कृतो यं तारयेन्नरम् * सकृदेव प्रपन्नाय * इत्यादिना सकृत्त्वविधानेनासकृदावृत्ततया पुरुषविद्या न तत्राङ्गम् । किं च प्रपत्तेरानुकूल्यसंकल्पादिव्यतिरेकेणाङ्गान्तरासहत्वाच्च पुरुषविद्याङ्गत्वानुपपत्तिः ॥

न च वेदान्तविहितविद्यात्वेन * विकल्पोऽविशिष्टफलत्वात् * इति न्यायविषयत्वेनाविशिष्टफलतया गुरुलघुविकल्पायोगेन विद्यान्तरोक्तावृत्त्यादिप्राप्तिः न्यासविद्यायामप्यविशिष्टेति वाच्यम । * न हि वचनविरोधे न्यायः प्रभवति * इति न्यायेन सकृत्त्वस्य वचनसिद्धतया तत्रावृत्त्यादिप्रसञ्जकन्यायानामप्राप्तेः । तदुक्तं श्रुतप्रकाशिकायाम् * यद्यपि साक्षात्काररूपत्वभक्तिरूपत्वादिपराणां वाक्यानां विद्याविशेषप्रकरणगृहीतत्वेऽपि सर्वोपासनसाधारणत्वं गुरुलघुयत्नविकल्पानुपपत्तेः प्राप्तम्; तथाऽपि प्रपदने तु लघुगुरुविकल्पानुपपत्तिरूपन्यायो वचनबलप्रतिक्षिप्तः । * न हि वचनविरोधे न्यायः प्रभवति' वचनविरोधाभावादुपासनेषु तस्य प्रवृत्तिः * इति । अतः, न्यासविद्यायास्सकृत्त्वादसकृदात्मकत्वेन न तत्र पुरुषविद्याया अङ्गत्वम् । अपि तर्हि निर्भरत्वानुसन्धानपरत्वमेव ॥

किं च * अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति * इति स्मृतौ प्रपत्तिविधानानन्तरं कृतकृत्यत्वविधानेन अत्रापि स्थानप्रमाणेन पूर्वानुवाकस्य न्यासविधायकत्वेनात्र कृतकृत्यत्वविधानस्योचितत्वात् । तस्मात्सर्वत्र प्रपत्तिविधानानन्तरं तदनुष्ठातुरुपायांशे कृतकृत्यताविधानात् उपायान्तरदुश्शकत्वकृतशोक(स्य)निवृत्तेः, वरणमात्रोपदेशेनानिवृत्तेश्च । मा शुचः इत्यस्योपायांशे कृतकृत्यताभिप्रायत्वात्; तदन्वयवैघटयेन वरणं नाधिकारिविशेषणम्, अपि तु साधनमेवेति ॥

अत्राह;

(इरण्डुमित्यादि)

"वरणस्य साधनत्वादेव हि 'मा शुचः' इत्यस्य साधनानुष्ठानांशे कृतकृत्यता विधीयते; अतस्तस्य साधनत्वात्तदनुष्ठानेन मम दोषगुणहान्योर्हानिर्जाता । अतः परमहं निर्भरो निर्भयोऽस्मि" इति चेन्मन्यसे; तदा स्वकृतभरसमर्पणस्य ईश्वकृतभरस्वीकारस्य च प्रच्युतत्वात् दोषगुणहानियुक्तपूर्वावस्थैव स्यादित्यर्थः ॥

अयं भावः; अस्य भरो नाम भक्त्याद्युपायान्तरानुष्ठानम् * त्वमेवोपाय भूतो मे भव* इति, उपायान्तरस्थाननिवेशनप्रार्थनेन तस्य तथात्वात् । भरसमर्पणं च न भरो भवितुमर्हति, येन, स्वकृत्योपायस्य कृतत्वसंभवः । ततश्च, यदि स्वानुपायमेवोपायसमर्पणमुपायानुष्ठानत्वेन बुध्येत; तदा भरस्य समर्पितत्वमनुष्ठितत्वं च विरुद्धमिति समर्पणं प्रच्युतं भवेत् । स्वभरानुष्ठानासामर्थ्यात् मयि भरे न्यस्ते सति मया च तं स्वीकृत्य तस्मिन्नधिकृते सति पुनर्दुर्वासनावशादनुष्ठितभरसमर्पणमेव स्वोपायकृत्यत्वेन मत्वा कृतघ्नस्सन् स्वात्मानमनुष्ठितोपायं मनुते, तस्मादयं भरस्त्यक्तव्य इति स्वीकृतोपायस्य त्याग एव प्रसज्येतेति पूर्वावस्थैवापद्येतेति ॥

यदुक्तम्, * मा शुचः * इत्यस्य स्वकृत्योपायस्य कृतत्वाभिप्रायत्वाद्वरणस्य साधनत्वसिद्धिरिति । तदयुक्तम् । तस्योक्ततात्पर्यकत्वे कल्पकाभावात् । न च शोकनिवृत्तिः कल्पिका । सर्वधर्मपरित्यागाङ्गत्वेन एकशब्दोक्तस्वीकारानुपायत्वबुद्धिसंस्कृतेन प्रकृतस्वीकारेण विशिष्टस्य * त्वाशब्दोपस्थापितत्वात् स्वप्रवृत्त्यनर्हत्वं प्रकृतम् । * मोक्षयिष्यामि * इत्यत्र भगवतश्चेतनकृत्याधिकृतत्वं चोक्तम् । अतः प्रकृतयोः स्वप्रवृत्त्यनर्हत्वचेतनकार्याधिकृतत्वयोश्शोकनिवृत्तिहेतुत्वेन विवक्षितत्वोपपत्तेः । तस्यान्यथासिद्धत्वात् । पूर्वं स्वकृत्यस्य भरस्य भगवति समर्पितत्वेन कृतकृत्यत्वासिद्धेश्च ॥

ननु, स्थानप्रमाणेन एतदुपबृंह्यश्रुतौ पुरुषविद्यायां कृतकृत्यत्वस्योत्तरकृत्यत्वेनोक्तत्वात् शोकनिवृत्तिहेतुत्वं कृतकृत्यत्वस्य श्रुतिसिद्धमिति प्रकृतत्वलिङ्गमात्रं श्रुत्या बाधितमिति चेत् न; तस्याः प्रकृतन्यासविद्याङ्गभूतयज्ञाद्यनुष्ठानप्रतिनिधित्वेनोपासकशरीरावयवेषु यज्ञावयवकल्पनेनासकृदावृत्तानुसन्धानपरत्वात् ॥

न च * सकृदेव प्रपन्नाय * इति स्मृतिवचनात्, श्रुतप्रकाशिकावचनाच्च पूर्वप्रकृतन्यासविद्याया अनावृत्तेरुक्तत्वात् पुरुषविद्या नाङ्गविद्येति वाच्यम् । स्मृतिवचनश्रुतप्रकाशिकावाक्ययोष्षडङ्गप्रपत्तिविषयत्वात् । * ब्रह्मणे त्वामहस ओम् इत्यात्मानं युञ्जीत * इति पूर्वानुवाकविहिताया वसुरण्यादिप्रणवान्तमन्त्रकत्वेन षडङ्गयोगभिन्नत्वस्योत्तरत्र वक्ष्यमाणत्वाच्च । पुरुषविद्याङ्गत्वेन कृतकृत्यत्वविधानपरत्वाभावात् * तैत्तिरीयाम्नाता पुरुषविद्या ब्रह्मविद्याङ्गम् * इति भाष्यकारवचनाच्च ॥

न च, अङ्गशब्दो विध्यङ्गभूतार्थवादभागपरः । विद्याशब्दाङ्गशब्दयोरस्वारस्यापत्तेः । * ब्रह्मप्राप्तिरेवात्र फलम् * इति भाष्यविरोधश्च । किं च पुरुषविद्याया उपासनात्मकत्वाभावे अङ्गोपसंहारार्थभेदचिन्तनमनर्थकमापद्येत । * यन्मरणं तदवभृथः * इति पुरुषविद्याया आप्रयाणं विद्यान्तरवदहरहरनुष्ठेयत्वं शब्दादेवावगम्यत इति । पूर्वानुवाकोक्तन्यासलक्षणब्रह्मविद्याया विलम्बाक्षमाधिकारत्वात् विलम्बाक्षमस्य भगवदनुभवशिथिलीकृतबाह्यान्तःकरणत्वात् * सहकारित्वेन च * इति यज्ञाद्यनुष्ठानाभावे विद्यानिष्पत्त्यनुपपत्तेश्च । उपासकावयवेषु यज्ञाङ्गपरिकल्पनं तदनुष्ठानप्रतिनिधित्वेन विधीयते । यज्ञादिचाप्रयाणादहरहरनुष्ठेयमितीयमप्यहरहरनुष्ठेया ॥

किं च * इदानीं ब्रह्मोपासनानां गुणोपसंहारविकल्पनिर्णयाय विद्याभेदाभेदचिन्ता प्रस्तूयते * इति भाष्यग्रन्थे * पुरुषविद्यायामपि चेतरेषमनाम्नानात् * इत्यधिकरणचिन्तितयोः तैत्तिरीयकछान्दोग्यपुरुषविद्ययोः छान्दोग्यपुरुषविद्यावत्, तैत्तिरीयकपुरुषविद्याप्युपासनरूपेत्यवगम्यते । एवम्, पुरुषविद्याया उपासनात्मिकाया उपासनरूपन्यासविद्याङ्गत्वात्, यज्ञाद्यनिष्ठानप्रतिनिधित्वेनाप्रयाणादहरहरनुष्ठेयत्वाच्च न कृतकृत्यतानुसन्धानपरत्वमिति ॥

न च, * अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति * इति वचने प्रपत्तिविधानानन्तरं कृतकृत्यताविधानात्, स्थानप्रमाणेनात्रापि पूर्वोत्तरानुवाकयोस्तथात्वं प्रत्यभिज्ञायत इति वाच्यम्; तत्र कृतकृत्यत्वस्योपायांशे कृतकृत्यतापरत्वाभावात्; किं तु नित्यनैमित्तिकांशे कृतकृत्यता हि तत्र विधीयते; उक्तवचनस्य सामान्यस्य * छागपशुन्यायेन * देवर्षिभूतात्मनृणाम् * इत्यादिविशेषवचने पर्यवसानात् । यथा * तेषां राजन् सर्वयज्ञास्समाप्ताः । * इति वचनस्येवास्यापि तत्र

पर्यवसानात् । ततश्च, ऋणत्रयापाकरणाभिप्रायं कृतकृत्यत्ववचनमिति न तदनुरोधेनोपायांशे कृतकृत्यत्वसिद्धिः । तस्मात् * मा शुचः * इत्यस्योपायांशे कृतकृत्यताविधानपरत्वाभावात् स्वकार्ये स्वस्यानधिकृतत्वम् । तत्र भगवतोऽधिकृतत्वमेव शोकनिवृत्तिहेतुत्वेन विवक्षितम् । अन्यथा, भरसमर्पणस्य स्वकृत्यत्वाभावेऽपि समर्पणमात्रात् कृतकृत्यताभिमाने स्वानुष्ठितभरसमर्पणम्, भगवदनुष्ठितभरस्वीकारश्च, प्रच्युतो भवेत् । तस्मात् वरणस्याधिकारिविशेषणत्वे * मा शुचः * इत्यस्य बाधकत्वाभावात् वरणमधिकारिविशेषणमिति सिद्ध्यति ॥

एवम् * मा शुचः * इत्युक्तेश्वराभिप्रायरूपतत्स्वभावपर्यालोचनया चरमश्लोके निरपेक्षत्वप्रतीतेः मन्त्रेऽवगतमुपायत्वं निर्हेतुकमिति ॥

संग्रहः ;

श्लोके शोकनिवृत्तिश्चेत्कृतकृत्यत्वतत्परा । कृत्यं भक्त्याद्यनुष्ठानं न भरस्य समर्पणम् ॥
अतोऽकृत्यकरे स्वस्मिन् कृतकृत्यत्वमानतः । समर्पणञ्च स्वीकारः प्रच्युतो भवति ध्रुवम् ॥
तस्माच्छोकनिवृत्त्यर्थं प्राप्तः कारुणिकस्सदा । शक्तस्त्वद्रक्षणोद्युक्तो यतोऽहमखिलेश्वरः ॥
अतोऽनधिकृतश्चासि प्राप्तौ नार्हसि शोचितुम । ‡ इत्युक्तवान्यतोऽतश्च पदं 'मा शुच' इत्यपि ॥
श्रुत्या पुरुषविद्यायां कृतकृत्यत्वबोधनात् । अनेनेति स्मृतौ चापि कृतकृत्यत्वमुच्यते ॥
वरणस्यानुपायत्वे तन्न सिद्धं भवेत्ततः । वरणस्याप्युपायत्वं वक्तव्यमिति चेन्न तत् ॥
प्रपत्तेरनुपायत्वं व्यनक्तीति सतां मतम् । यतः पुरुषविद्या च यज्ञप्रतिनिधिः श्रुता ॥
कृतकृत्यस्मृतिश्चापि अनृणत्रयगोचरा । तस्मात् क्वापि प्रपन्नेऽस्मिन् कृतकृत्यविधिर्न च ॥

ननु, * भगवति हरौ पारं गन्तुं भरन्यसनं कृतं परिमितसुखप्राप्त्यै कृत्यं प्रहीनमकृत्यवत् ।
भवति च वपुर्वृत्तिः पूर्यं कृतैर्नियतक्षमा परमिह विभोराज्ञासेतुर्बुधैरनुपाल्यते ॥ *

इति प्रपत्तावनुष्ठितायामुपायांशे कृतकृत्यत्वानुसन्धानम्, वेदान्ताचार्योक्तं कथं संगच्छत इति चेत्; तस्य षडङ्गयोगभूतसाधनप्रपत्तिपरत्वात् शरणागतेस्तद्भेदस्य वक्ष्यमाणत्वाच्च ॥

इति शोकनिवृत्तिकारणचिन्ताधिकारः ॥ १५ ॥

इति श्रीवचनभूषणस्य विरोधिपरिहारे प्रथमस्य परिच्छेदस्य द्वितीयं प्रकरणम् ॥

॥ १६ ॥ अथ देशकालादिनियमाभावाधिकारप्रारम्भः ॥

एवम् द्वितीयप्रकरणे प्रथमाधिकारे, * व्रज * इति विध्युत्था शङ्का परिहृता । द्वितीये * मोक्षयिष्यामि * इति पदोत्था । तृतीये * अहं शब्दोत्था । चतुर्थे * मा शुचः * इति शब्दोत्था । एवमधिकारचतुष्टयेन वरणस्याधिकारिविशेषणत्वस्थापनमुखेन निर्हेतुकत्व स्थापितम् । तदेव निर्हेतुकत्वम् ।

पा. ‡ इत्युक्तवान्यतश्चेशः श्लोके मा शुच इत्यपि ।

तृतीयचतुर्थप्रकरणाभ्यामपि मुखभेदेन स्थाप्यते ॥

द्वितीयप्रकरणे विधेरधिकारिविशेषणविषयत्वाद्गुणाभावदोषयोस्ततोऽपि तदनादरेणार्जुनादीनामङ्गीकारदर्शनात्, प्रत्युत दोषगुणहान्योः भोग्यत्वेन स्वीकृत्य विषयीकारस्वाभाव्यात्, सौशील्यवात्सल्यकारुण्यादिकल्याणगुणयुक्तत्वस्वाभाव्यात्, स्वीकृतचेतनकृत्यत्वप्रदर्शनेन शोकनिवर्तकत्वस्वाभाव्याच्च वरणस्याहेतुत्वमिति प्रपत्तव्यस्वभावपर्यालोचनया समर्थितम् ॥

इतः परं प्रपत्त्यनुबन्धिदेशकालाद्यनियमस्वभावपर्यालोचनयापि तदेव समर्थ्यते ॥

यद्यपि प्रपत्तिस्वरूपपर्यालोचनानन्तरं प्रपत्तव्यस्वरूपनिरूपणं कार्यम् । तथापि, श्रीनारायणशब्दार्थयोः पुरुषकारोपायस्वरूपसंबन्धिनोः निरूपणानन्तरं तत्संबन्धभूतस्य मतुप्प्रत्ययार्थस्य निरूपणमन्तरङ्गमिति, तन्निरूपणमुखेन वरणस्याहेतुत्वमुच्यते ॥

पूर्वम्, अधिकारचतुष्टयेनाप्यस्य वरणस्याधिकारिविशेषणत्वस्थापनात् विधिरधिकारिविशेषणविधिरिति प्रधानविधिनिरूपणं कृतम् । इदानीं, प्रधानभूतानुबन्धविधिर्निरूप्यत इति वा सङ्गतिः ॥

प्रथमे श्रीशब्दार्थः, द्वितीये नारायणवरणशब्दार्थः, तृतीये मतुप्प्रत्ययार्थः, चतुर्थे क्रियाशब्दार्थः, आहत्य प्रकरणचतुष्टयेनार्थचतुष्टयनिरूपणमुखेन परिच्छेदमात्रानुयायिशरणशब्दार्थो निर्हेतुक इति निरूप्यते । वरणस्योपायत्वे पुरुषकारस्यापि व्यर्थत्वात् । पुरुषकारप्रकरणमप्युपायतानिर्हेतुकत्वौपयिकमिति, परिच्छेदमात्रं निर्हेतुकोपायत्वपरमिति वा योजनीयम् । कालानियमपरस्य च मतुप उपलक्षणत्वात् । अत्र देशाद्यनियमोऽपि निरूप्यते । कर्माद्यनुष्ठाने कालस्याभ्यर्हिताङ्गत्वात् । तदनियमे देशप्रकाराद्यनियमोऽप्यर्थसिद्ध इति वा देशाद्यनियमस्य मतुबर्थत्वेन वर्णनम् । पूर्वम् * अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् * इति प्रकृतत्वात् तत्र नियतमन्त्रकत्वप्रतीत्या कालादिनियतत्वमपि प्रत्यभिज्ञाप्यते । ततश्च, नियतपरिकरस्य कथमहेतुत्वमिति शङ्कया चरमाद्याधिकारयोस्सङ्गतिः ॥

वरणस्याधिकारिविशेषणत्वे सिद्धोपायाङ्गत्वे वा व्याजमात्रत्वमुक्तं भवति । सहेतुकत्ववादिभिरपि तस्य व्याजत्वमेवोच्यते । अत एवोक्तं वेदान्ताचार्यैः * प्रपत्तेर्व्याजमात्रत्वम् * इति । ततश्च यया कयाचिद्विधया यत्किञ्चिच्चेतनव्यापारसापेक्षत्वेऽपि न निर्हेतुकत्ववादसिद्धिरित्याशङ्कायाम्, अधिकारिविशेषणत्वे स्वरसात्, द्वितीयप्रकरणे सिद्धोपायाधिकारत्वेन स्थापितस्य वरणस्यास्मिन् तृतीयप्रकरणे फलप्रपत्तित्वं प्रसाध्यते । देशकालादिनियतसाधनप्रपत्तिभूतषडङ्गयोगभेदसाधनमुखेन देशाद्यनियता शरणागतिः फलरूपेति वर्ण्यते ॥

प्रपत्तिक्कु देशनियममुम् कालनियममुमिल्लै ।

अयमत्र संशयः । मन्त्ररत्ने भगवदुपायतानिर्हेतुकत्वावगमो नास्ति, उतास्तीति । तदर्थम्, शरणागतेः फलरूपत्वं न संभवति, उत संभवतीति । तदर्थम् देशादिनियमाभावविधिर्नास्ति, उतास्तीति । तदर्थम् तदस्तित्वे देशकालनियमानियमविध्योरेकत्रोपसंहारस्संभवति, उत न संभवतीति । तदर्थम्, अनियम-

विधेरापद्विषयत्वं वा, अमन्त्रकप्रपत्तिविषयत्वं वा, तान्त्रिकमन्त्रकप्रपत्तिविषयत्वं वा संभवति; उत न संभवतीति ॥

यदा न संभवति, तदा नियमानियमविध्योरेकत्रोपसंहारसंभवान्न तयोर्विद्याभेदकत्वम् । यदा चानियमविधेरेवासंभवः तदा न सुतरां विद्याभेदसिद्धिरिति पूर्वपक्षे फलफलिभावः । यदा चानियमविधिस्संभवति; यदा च तस्यापदादिविषयत्वं च न संभवति; तदा नियमानियमविध्योरेकत्रोपसंहारस्याशक्यत्वात् विद्याभेदसिद्धौ फलप्रपत्तिसिद्धिरिति राद्धान्ते फलफलिभावः ॥

पूर्वप्रकरणे चरमाधिकारे चरमश्लोकचरमपदार्थो निरूपितः । अत्र प्रथमाधिकारे चरमश्लोकप्रथमपदार्थो निरूप्यते । * सर्वधर्मान्परित्यज्य * इत्यत्र सर्वशब्दार्थभूतानुबन्धिदेशकालप्रकाराधिकारिणां सवासनपरित्यागस्याङ्गत्वेन प्रतिपादनात् मन्त्रस्थमतुप्प्रत्ययः कालानियतिपरः प्रथमपदेनोपबृंहितो भवतीति मतुप्प्रत्यये लक्षणया अर्थतो वा देशकालप्रकारादीनामप्युपस्थितेः उपबृंहणानुरोधेन मतुप्प्रत्ययार्थतया देशकालप्रकाराधिकार्यनियमोऽत्राधिकारत्रयेण निरूप्यते ॥

पूर्वपक्षस्तु; प्रपत्तेः देशकालनियमाभावोऽसिद्धः । * पुण्येऽनुकूले समये देशे भागवतोत्तरे । निमज्ज्य नियतस्तीर्थे प्रणिपत्याश्रयेद्गुरुम् । * द्वादश्यां श्रवणे वापि कस्मिंश्चिद्वैष्णवे दिने । अनुकूलेऽहनि शुभे * इत्यादिषु देशकालाङ्गत्वं हि प्रतिपाद्यते । यत्साङ्गम् तत्साधनम् * इति हि व्याप्तिः ॥

ननु, * स एष देशः कालश्च * इत्यादीनां तन्नियमाभाववचनानामपि सत्त्वात् नियमानियमयोरेकत्रोपसंहारस्याशक्यत्वात् विद्याभेदसिद्धिः । तत्र नियमसापेक्षा साधनप्रपत्तिः । तन्नियमनिरपेक्षा फलप्रपत्तिरिति सिद्ध्यतीति चेत् न; अनियमवचनानां प्रपत्तिवैभवपरत्वेनार्थवादत्वात् । अनियमस्य स्वतः प्राप्तत्वेन विधेयत्वासंभवाच्च । तथा हि — तत्र किं कर्तव्यताबोधने विधिव्यापारः? उताज्ञातज्ञापनमात्रे । नाद्यः; प्रपत्तिगतदेशकालनैरपेक्ष्यस्य यत्नागोचरत्वात् । न च तद्विधेर्विशिष्टदेशकालत्यागे तात्पर्यम्, अपसिद्धान्तात् । तथाऽनुष्ठानादर्शनाच्च । न द्वितीयः, तदविधानादेव तन्नैरपेक्ष्यसिद्धेः, तज्ज्ञानस्याविधेयत्वात् ॥

ननु, भक्त्यादिवदस्या अपि श्रेयस्साधनतया देशकालविशेषाङ्गकत्वप्राप्तौ तन्नैरपेक्ष्यं विधीयत इति चेत्; तर्हि, तद्विधानानर्थक्यपरिहाराय देशकालनैरपेक्ष्यज्ञानमङ्गमित्युक्तं स्यात् । तथा सति प्रतिज्ञाव्याघातः; तस्मात् देशाद्यनियमविधेरसंभवात्तद्वचनमर्थवादमात्रम् । अस्तु वा तद्विधिसंभवः । तथापि न विद्याभेदसिद्धिः । दृष्टार्थप्रपत्तेर्मन्त्रनिरपेक्षतया तत्रानियमविधेरवकाशत्वात् * कामं लोकप्रमाणस्य कामास्सिद्ध्यन्ति कामिनः । गृहीतसत्पथस्यैव निरपायः फलोदयः * इति दृष्टार्थप्रपत्तेर्मन्त्रानपेक्षत्ववचनात् ॥

यद्वा, देशाद्यनियमविधिरापद्विषयः । आपत्सन्न्यासादौ नियमादर्शनात् । अथवा * देशकालादिनियममरिमित्रादिशोधनम् * इत्याद्यनियमवचनानि स्त्रीशूद्राद्यधिकारतान्त्रिकमन्त्रकप्रपत्तिपराणि * न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा । स्त्रीणां तु शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ॥ * इत्यादिविशेषवचने सामान्यविशेषन्यायेन पर्यवसानात् । अतश्च देशकालादिनियमविधिः वैदिकमन्त्रप्रपत्तिविषयः । तदनियमविधिस्तान्त्रिकमन्त्रप्रपत्तिविषय इति न विद्याभेदसिद्धिः ॥

न च * श्रद्धैव कारणं पुंसामष्टाक्षरपरिग्रहे । * आसीना वा शयाना वा * इत्यादिषु वैदिकमन्त्रस्याप्यनियम उक्त इति वाच्यम् । * तत्रोक्तरायणस्यादिर्बिन्दुमान्विष्णुरन्ततः । बीजमष्टाक्षरस्य स्यात्तेनाष्टाक्षरता भवेत् ॥ * इत्युक्ततया तान्त्रिकस्याप्यष्टाक्षरतोपपत्तेः । तस्मात् न देशाद्यनियमविधिबलात्फलप्रपत्तिसिद्धिरिति ॥

तत्राह ;

(प्रपत्तिक्कित्यादि)

मन्त्ररत्नप्रतिपाद्यप्रपत्तेः देशकालविशेषनियमापेक्षा नास्ति ; अतस्सा भगवत्प्रसादफलभूता । लोके यद्यत्साधनम्, तत्तत् देशकालनियमसापेक्षं दृष्टम् । यथा यागादि । या फलप्राप्तिः सा सर्वा तदनपेक्षा दृष्टा ; यथा स्रक्चन्दनादिनिषेवणम् ॥

न चानियमवचनानां विधित्वासंभवः, कर्तव्यताबोधनस्यैव विधित्वात् । न च देशकालनैरपेक्ष्यस्य प्रपत्तिधर्मस्य विधेयतानुपपत्तिः । तत्त्यागे विधितात्पर्यात् । न च विनिगमनाविरहः । नैरपेक्ष्यमात्रपरत्वस्यापि संभवादिति वाच्यम् । * सर्वधर्मान्परित्यज्य * तस्मात्त्वमुद्धवोत्सृत्य चोदनां प्रतिचोदनाम् * इत्यादित्यागविधौ पर्यवसानात् । न चोक्तवाक्यस्य देशविशेषादित्यागपरत्वाभावः * तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता * इत्युक्तरीत्या देशादीनामपि श्रेयस्साधनत्ववेषेण धर्मत्वोपपत्तेः । * कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत । शरीरे च गतौ चापि वर्तते मे महद्भयम् ॥ * इत्युपायान्तरवत् तदनुग्राहकदेशादेरपि त्याज्यतावचनेन देशादेरपि सर्वशब्दोपस्थितत्वात् । न चैवं विशिष्टदेशकालपरित्यागेनाशुद्धदेशकालादिप्रसङ्गः, विशिष्टदेशकालयोः प्रपत्त्युपकारकत्वबुद्धित्यागस्य विधेयत्वात् । न च, तेन साङ्गतया साधनत्वापत्तिः । भावरूपत्वाभावेन तदप्रसङ्गात् । एवम्, देशकालानियमविधिसंभवात् नियमानियमयोश्च अन्त्रोपसंहारायोगाच्च विद्याभेदसिद्धिः ॥

ननु, अनियमविधिसंभवेऽपि न फलप्रपत्तिसिद्धिः, अनियमविधेरापद्विषयत्वादित्यत्राह * स एष देशः कालश्च * इत्यादि । अनियमविधिरापद्विषयेति न युज्यते वक्तुम् ; विभीषणप्रपत्तावनियमदर्शनेनाप्यापदो दृष्टत्वात् । तथा च विद्याभेदप्रयुक्तावेव नियमानियमौ ॥

ननु, विभीषणप्रपत्तिरमन्त्रका । अत एव तत्रानियमदर्शनम् । नियमविधिस्समन्त्रके प्रपदने स्यादित्यत्राह –

(इव्वर्थम् मन्त्ररत्नत्तिल् प्रथमपदत्तिले सुस्पष्टम्)

मन्त्ररत्न एव मतुपा तत्प्रतिपाद्यप्रपत्तिमात्रे कालादिनियमानपेक्षत्वस्य प्रतिपन्नत्वात् । समन्त्रकप्रपत्तावपि तन्नैरपेक्ष्यसिद्धिरित्यर्थः ॥

अयं भावः ; सापेक्षत्वं समन्त्रकत्वोपाधिकृतम्, न तु प्रपत्तिस्वरूपकृतमिति समन्त्रकप्रपत्तावेव

तन्नियमः; अमन्त्रकायां त्वनियम इति न शक्यते वक्तुम् । मन्त्रे तस्य देशादिनैरपेक्ष्यदर्शनात् * देशकालादिनियमस्तु * अरिमित्रादिकं तस्य पौन (र) श्चरणकं न तु * इत्यादिस्मृत्युपबृंहितमतुप्प्रत्ययस्य तत्र मानत्वादिति । नन्विदं वचनं तान्त्रिकमन्त्रविषयम्; वैदिकमन्त्रे देशादिनियमोऽस्त्येव; अतः वैदिकमन्त्रविषयो नियमविधिः, तदतिरिक्तसर्वविषयस्तदभावविधि इति चेत्; मैवम्, द्वयेऽपि प्रणवान्वयेन वैदिकमन्त्रेऽपि मतुप्प्रत्ययसिद्ध-देशाद्यनियमदर्शनात् * ओमित्येकाक्षरं मन्त्रमेकं गूढार्थमुच्यते । प्रकाशार्थं तयोरेकमक्षरैः पञ्चविंशकैः ॥ तस्मान्मन्त्रद्वयं ब्रह्म षड्विंशत्यक्षरं विदुः । तस्य विष्णोः प्रसादेन मया लब्धं द्वयं विभोः ॥ प्रणवं मन्त्ररत्नं च मन्त्रद्वयमुदाहृतम् । प्रणवं प्रणवादूर्ध्वं मन्त्रद्वयमुदाहृतम् ॥ * इति वचनात् ॥

न च, प्रणवस्य द्वयान्वितत्वेऽपि तद्विहीनस्य तान्त्रिकत्वात् तद्विवक्षया मतुप्प्रत्यय इति वाच्यम् * सर्वेषां तान्त्रिकं तु वा * इत्युक्तस्य विकल्पस्यासिद्धिप्रसङ्गात् । अनियतदेशकालादिकस्य तान्त्रिकस्य लघुत्वात् । नियतदेशादिकस्य वैदिकस्य गुरुत्वाच्च । उभयोरनियतविकल्पानुपपत्तेः । अन्यथा गुरुशास्त्रप्रामाण्यापातात् । अतः देशादिनियमापेक्षा न वैदिकमन्त्रस्वभावकृता; अपि तु, प्रपत्तेर्मोक्षसाधनत्वकृता । तन्नैरपेक्ष्यमपि प्रपत्तेः फलत्वकृतम् । न तु वैदिकमन्त्राङ्गकत्वाभावकृतम् । ततश्च देशादिनियमसापेक्षत्वानपेक्षत्वयोः विद्यास्वभावनिबन्धनत्वाद्विद्याभेदसिद्धिः ।

किंच, अत्रानियमविधेः विशिष्टदेशकालपरित्यागविधिपर्यवसन्नत्वात् तत्त्यागाङ्गत्वम्; आपत्कालीने अमन्त्रके तान्त्रिकमन्त्राङ्गके च प्रपदनेन संभवति; आपत्कालीनकर्मणः अनापत्कालीनकालतदङ्गनैरपेक्ष्येऽपि तद्विरोधित्वाभावात् । अमन्त्रकेऽपि तद्विरोधित्वं नास्ति, विशिष्टदेशकालकृतत्वे फलसिद्धिप्रसंगात्, तान्त्रिकमन्त्रकेऽपि तद्विरोधो नास्ति । विशिष्टदेशकालयोस्स्वरूपेण वा बुद्ध्या वा त्यागस्याङ्गत्वेनानुष्ठानादर्शनात् विशिष्टदेशकालयोः कृतस्य वफल्यप्रसङ्गाच्च । तान्त्रिकमन्त्रस्य विशिष्टदेशकालविरोधित्वे प्रमाणाभावाच्च । तस्मात् विशिष्टदेशकालयोः तदभावस्य चैकत्रोपसंहाराद्योगेन विद्याभेदसिद्धौ, सिद्धोपायसाध्यत्वेन फलप्रपत्तिभूता शरणागतिः चेतनप्रवृत्तिरूपसाधनविरुद्धेति तदभावाङ्गिका शरणागतिः फलरूपा; तन्नियमश्च षडङ्ग उपसंहार्य इति षडङ्गयोगस्साधनप्रपत्तिरिति विद्याभेदसिद्धिरिति ॥

यद्यपि * न देशकालौ नावस्थां योगो ह्ययमपेक्षते * इति षडङ्गयोगे तन्नैरपेक्ष्यं श्रुतम् । ... * प्रणामः कीर्तनं वाऽपि स्मरणं वाऽपि केवलम् । एकैकमपि चाङ्गानां प्रपत्तिः प्राज्ञसंश्रया ॥ * इत्यादिना यथाचार्यनिष्ठप्रपत्तेः अङ्गाङ्गिपौष्कल्यविरहेऽपि कार्यकरत्वम्; एवमेव देशकालवैकल्येऽपि तन्निष्ठप्रपत्तेः फलाव्यभिचार इत्यत्रोदाहृतवचनतात्पर्यम् । शरणागतौ तु नैवं तन्नैरपेक्ष्यमात्रम्, अपि तु विरुद्धत्वात्तत्त्यागाङ्गकत्वमिति साभिद्यत एव । ततः फलप्रपत्तिरूपत्वाच्छरणस्य मन्त्रे उपायत्वस्य निर्हेतुकत्वसिद्धिरिति ॥

संग्रहः;

देशादिनियमाभावे विधिर्युक्तो न तद्विधिः । नैरपेक्ष्ये प्रपत्तिर्न तज्ज्ञानेऽभिमतिर्न च ॥
युज्यतां सतु अमन्त्रे वाऽप्यापदीयेऽथ तान्त्रिके । संग्राह्यो वरणे तस्मान्न विद्या भिद्यते ततः ॥
तत्त्यागाङ्गविधिस्साध्ये वरणे पर्यवस्यति । किं चात्र तान्त्रिकः कालनिरपेक्षो यदीष्यते ॥

पत्तेः स्वधर्मानुष्ठानार्थकत्वे पूर्वोत्तराङ्गविधीनामेव प्रमाणत्वात्, स्वधर्मानुष्ठानत्यागाङ्गकत्वे * सर्वधर्मान्
त्यादेः प्रमाणत्वाच्च, एकत्र विरुद्धगुणोपसंहारायोगाद्विद्याभेदसिद्धौ फलप्रपत्तिसिद्धिरिति ॥

* आनुकूल्येतराभ्यां यद्वर्णधर्माङ्गमीरितम् । वरणं तन्नसंकल्पमात्रमङ्गं श्रुतं यतः ॥
अतो विरुद्धधर्मत्वाद्विद्याभेदो न सिध्यति । इति चेत् तन्नसंकल्पशब्दोनुष्ठानलक्षकः ॥
स्वस्येत्यादि स्मृतेस्तेषां सन्निधिस्तु विधीयते । इत्याचार्यस्य सूक्तेश्चाप्याचारोप्यङ्गमीरितम् ॥
तथोत्तराङ्गता चास्य षडङ्गमिति च स्मृतेः । दृप्तप्रपत्तावित्यादिगुरुवाक्याच्च सिध्यति ॥
क्वचित्सङ्कल्पशब्दश्च पूर्णाङ्गारम्भसूचकः । तस्मादाचारसापेक्षप्रपत्तेश्शरणागतिः ॥
भिन्ना तत्त्यागसापेक्षा फलरूपेति वर्णिता ॥

अथवा प्रकारशब्देन विद्यारंभविरोधिपापनाशकप्रायश्चित्तानुष्ठानं विवक्षितम् । तदेवं संग्रह
गवदुपायत्वस्य निर्हेतुकत्वं न संभवति, उत संभवतीति । तदर्थम् फलप्रपत्तिर्नास्ति, उतास्तीति ।
दर्थम् प्रपत्तिविद्या न भिद्यते, उत भिद्यत इति । तदर्थम् कृतप्रायश्चित्तत्वाकृतप्रायश्चित्तत्वाधिकाररूप-
विरुद्धधर्मद्वयसमावेशो नास्ति, उतास्तीति । तदर्थम् * शाश्वती मम संसिद्धिः * इत्याद्यभिहितशेषवच-
नस्य तापादिसंस्कारत्रयस्य मन्त्रदीक्षाविधेश्चाङ्गत्वम्, उत प्रायश्चित्तत्वमिति । यदा तेषामङ्गत्वम्, तदा
र्वत्र प्रपत्तेरकृतप्रायश्चिताधिकारत्वाद्विरुद्धधर्मद्वयाभावेन विद्याभेदासिद्धेः न फलप्रपत्तिसिद्धिरिति न निर्हेतुकत्व-
सिद्धिः । यदा तेषां प्रायश्चित्तत्वम्; तदा अकृतप्रायश्चित्तानां काकादीनामपि दर्शनात्, विरुद्धधर्मद्वय-
समावेशेन विद्याभेदात् फलप्रपत्तिसिद्धेः निर्हेतुकत्वसिद्धिरिति ॥

पूर्वेण [illegible] मस्म्यपराधानामालयः * पापिष्ठः क्षत्रबन्धुश्च * वधार्हमपि काकुत्स्थः * दोषो यद्यपि
[illegible] अकृतप्रायश्चित्तानामेव प्रपत्तावधिकारदर्शनात्, प्रपत्तेस्सर्वत्राकृतप्रायश्चित्ताधिकारत्वेन
[illegible] मानाभावात् । न च श्रेयस्साधनभूतकर्ममात्रस्य कर्तृयोग्यतापादकतत्संस्कार-
[illegible] नुष्ठानपूर्वकत्वदर्शनेन अत्रापि विद्यारम्भविरोधिपापनाशार्थं प्रायश्चित्तमनुष्ठेयमिति
[illegible] मस्म्यपराधानाम् * इत्यादिविशेषवचनेन तत्परसामान्यवचनानां प्रपत्तिव्यतिरिक्तविषयत्वात् ॥

* शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत् । पुरुषं परमुद्दिश्य न मे सिद्धिरतोऽन्यथा *
[illegible] ज्ञानस्य * क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता * इत्य[illegible] विशेषवचनपर्यवसानात
[illegible] द्धम् । तथा च * वक्ष्यामि मुनयस्सर्वे विष्णोराश्र[illegible] णाम् । मन्त्रदीक्षावि
[illegible] धिं तथा ॥ आद्यं तु शङ्खचक्रादिधारणं वैष्णवं स्मृतम् । पुण्ड्रं [illegible] प्राप्ति चैव मन्त्रं चैवार्चनं [illegible]
[illegible] पञ्च कर्तव्याः ब्राह्मणस्य विधानतः । तस्माच्चक्रादिसंस्काराः कर्तव्या मुनिसत्तमाः ॥ चक्रसंस्कारहीनेन
[illegible] र्म हि निष्फलम् । स्नात्वा शुभर्क्षे पूर्वाह्णे सम्यगभ्यर्च्य केशवम् ॥ स्नातं शिष्यं समाहूय कृतकौतुक-
[illegible] र ॥ * इत्यादि । अन्यत्रापि * प्रथमं तापसंस्कारो वैष्णवं मुनिभिस्स्मृतम् । मन्त्रसंस्कारसिद्ध्यर्थं
[illegible] क्षाविधौ तथा ॥ * अन्यत्रापि शङ्खचक्राङ्कनं कुर्याद्ब्राह्मणो बाहुमूलयोः । हुताग्निनैव सन्तप्य सर्व
[illegible] ॥ * इत्यादि । एवं प्रपत्त्यध्यायेषु तापादिसंस्कारत्रयस्य मन्त्रदीक्षाविधेश्च पापनाशकत्वमुक्त[illegible]

नर्गानामानुकूल्यादीनां प्रपत्त्यङ्गत्वश्रवणात् । अत एवोच्यते * आर्तप्रपत्तावेतेषां सन्निधिस्तु विधीयते
तद्प्रपत्तावेतानि भविष्यन्त्युत्तरोत्तरम् * इति । सकृत्त्ववचनानि, अङ्गारम्भविशिष्टाङ्गिपराणि ; ततश्चानुकूल्यादीन
देशाप्रयोगः पूर्वाङ्गम् ; तत्सहानुष्ठानानन्तरं यावज्जीवं तेषां षण्णामप्यनुष्ठानमुत्तराङ्गम् ; यावज्जीवमनुष्ठानमे
तस्माप्ये तेषां पूर्तिः ; आर्तानां स्वधर्मानुष्ठानपूर्तेः पूर्वमेव जातत्वात् । पूर्णान्यानुकूल्यादिषङ्गकानि तेषां पूर्वाङ्गानि
मन्त्राणां स्वधर्मानुष्ठानपूर्तेः पूर्वमसंभवात्, पूर्वाङ्गप्रारम्भरूपप्राथमिकानुष्ठानं पूर्वाङ्गम् ; अङ्गानुष्ठानानन्तरं ते
षण्णामपि यावज्जीवमनुष्ठानमुत्तराङ्गम् ; तदुच्यते, * एतानि भविष्यन्त्युत्तरोत्तरम् * इति । ततश्चार्तानामङ्गपूर्ति
पूर्वमेवभवति, दृप्तनामन्तकाले भवतीत्युक्तं भवति ॥

*
लघु न च अनुकूल्यादीनां षण्णामप्युत्तराङ्गत्वे मानाभावः ; * षडङ्गंतदुपायत्वं च शृणु मे पद्मसंभव
शास्त्रादेः प्रमाणत्वात् । न च, अष्टाङ्गयोग इतिवदङ्गाङ्गिसमुदायविवक्षया षडङ्गत्वेन निर्देशः, * सांगेत्वष्टाङ्गयो
व्यवहृतिस्यतष्षड्विधत्वोपचारः * इति वेदान्ताचार्यवचनादिति वाच्यम् ; स्वारसिकाङ्गसमुच्चयसंभवे तदयोगात
न च अङ्गान्तरानुपपत्तिः ; अस्योत्तराङ्गपरत्वेन पूर्वं पञ्चाङ्गैस्सहानुष्ठितस्य तथात्वात् । अत एव * न्या
पञ्चाङ्गसंयुतः * प्रपत्तिं तां प्रयुञ्जीत स्वाङ्गैः पञ्चभिरावृताम् * इत्यादेरपि न विरोधः, तेषां पूर्वाङ्गपरत्वात्
अत्र * षडङ्गम् * इत्यङ्गषट्कं पृथक् निर्दिश्य * तमुपायम् * इत्यङ्गिचार्थान्तरं निर्दिश्यते ; एवं स्वारसिका
परित्यागे बाधकाभावात्, पञ्चाङ्गत्वस्मृतेश्च, वर्णाश्रमाचारस्य सन्निपत्योपकारकत्वमारादुपकारकत्वं च सिद्धम्

न च * स एवोपर्युपर्यस्य परां प्रीतिमुपावहन् । वृत्त्याख्यः फलतां याति * इत्यादिवचनविरो
तत्र सकृत्कृतप्रपत्त्यनन्तरमानुकूल्याद्यनुष्ठानस्य फलत्वश्रुतेरिति वाच्यम् ; उत्तरवृत्तेः * तस्यैव बोधो न्यासा
प्रथमं यात्युपायताम् * इत्युक्तप्रपत्तिफलत्वेपि प्राप्त्यपेक्षयाङ्गत्वस्याप्युपपत्तेः । ... : फलत्ववचन
फलत्वबुद्धिसंस्कृतानां तेषामारादुपकारकत्वं नान्येषामिति नियमपराणि ॥ ... प्रमाणाभाव... । ...फलत्वेन फलप्रपत्ति

न च अहिर्बुध्न्यसंहितोक्तप्रथमाङ्गविवक्षया षडङ्गमिति निर्देशः, तस्य भक्त्यादि... षडङ्ग
इति शास्त्रप्रसिद्धनिरूपणासिद्धेः, तथानभ्युपगमेनापसिद्धान्ताच्च ; * भविष्यन्त्युत्तरोत्तर
वचनाच्च । इदं वचनमानुकूल्यसंकल्पस्यानुष्ठानपरत्वमप्यवगमयति, उत्तरोत्तरं संकल्पानुवृत्तेरदे
यथा केवलसंकल्पमात्रस्यानुवृत्तौ * आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः * इत्युक्तापायनिवृत्ते... इत्यादिना
फलव्याभङ्गानुपपत्तिरेव संकल्पशब्दस्य ल...कल्पिका । लक्षणाप्रयोजनं प्रोक्तम् । कथं तर्हि वेदान्ताचार्यैः... प्रपत्तेः
त्वमिति साभिप्र...तन्त्राणां षडङ्गयोगे ...द्रावारणाय स्वधर्मानङ्गिकां शरणागतिं तत्रान्तर्भावयितुं संक...क-
...प्रपत्ति
...म् ॥

न च * उपायापायसंत्यागी मध्यमां स्थितिमास्थितः * उपायापाययुक्तस्य वर्तमानस्य मध्यतः * ...
शरणागतेरपि वर्णाश्रमानुष्ठानाङ्गकत्वप्रतीतिरस्तीति वाच्यम् ; वर्तमानयोरेव कृत्यकरणाकृत्याकर
प्रवृत्त्यर्थत्वत्यागस्य * सर्वधर्मान्परित्यज्य * इत्यादिना विधीयमानत्वात् ; * आनुकूल्यस्य संकल्पः प्रातिकू
र्जनम् * इत्यादिनानुष्ठीयमानयोस्तयोरेवाङ्गतया कार्योपयोगित्वस्य विधीयमानत्वाच्च । शरणागतेः तदभाव
ङ्गयोगस्य तदङ्गकत्वस्य च सिद्धेः । एवं, आनुकूल्यसंकल्पप्रातिकूल्यवर्जनयोः स्वधर्मानुष्ठा

न च वाच्यम्, * या स्वधर्मेषु निरतिस्सा भवत्यनुकूलता * इत्यानुकूल्यसंकल्पनिर्वचनात् स्वधर्मानुष्ठानमेव संकल्प इति तत्रानुकूल्यलक्षणमुक्तम्, न तु तत्संकल्पलक्षणम् । किञ्च * आनुकूल्यमि प्रोक्तं सर्वभूतानुकूलता * इत्यादिलक्षणान्तरसत्त्वेन तदनिश्चयात्, अनुष्ठानवाक्ये च * कृतानुकूल्यसंक तिकूल्यं विवर्जयन् । विश्वासशाली कृपणः प्रार्थयन् रक्षणं प्रति ॥ आत्मानं निक्षिपति यद्धिया देवस्य पाद प्रपत्तिरियं सद्यः सर्वपापप्रणाशिनी * इति संकल्पमात्रमङ्गमिति च श्रुतम्, किञ्च संकल्पशब्द नुष्ठानपरत्वे लक्षणा च स्यात्, सा चायुक्ता, मुख्ये संभवति तत्कल्पनानुपपत्तेः । संबन्धानुपपत्तिभ्यां हि लक्षणा समाश्रीयते ? किञ्च लाक्षणिकशब्दप्रयोगो हि सर्वत्र सफलो दृष्टः ? यथा गङ्गाशब्दस्य घोषपावनत्वाति- त्यप्रकाशनम् । न चात्र संकल्पशब्दस्य लक्षणाविवक्षायां प्रयोजनमस्ति । तस्मादत्र यावज्जीवं भगवदानु- कूल्यं चरामीति संकल्पमात्रमङ्गम् । प्रातिकूल्यवर्जनं च क्वचिद्धर्मानुष्ठानमुच्यते, * स्वस्य स्वामिनि वृत्तिर् प्रातिकूल्यस्य वर्जनम् * इति । क्वचिच्च * वर्जनं प्रतिषिद्धानां तथैवाप्रतिकूलता * इति निषिद्धवर्जन- मित्युच्यते ; ततश्चोदाहृतवचनेषु निष्पन्नोर्थः * आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः * इति दर्शितः । अतः यावद्देहावसानं कर्तव्ययोः विहितकरणनिषिद्धाकरणयोः आनुकूल्यप्रातिकूल्यवर्जनशब्दाभ्यां विवक्षितत्वात् तादशयोश्चाङ्ग्यनुष्ठानकाले कर्तुमशक्यत्वात्, साङ्गप्रपदनस्य सकृत्त्वाच्च तदुभयसंकल्पमात्रमङ्गमिति निश्चीयते ॥

न च यावज्जीवकर्तव्यत्वेन संकल्पितयोस्तयोरनन्तरमनुष्ठानं संकल्पप्रयुक्तमित्यङ्गता स्यात् इति वाच्यम् * इत्यादावङ्ग्यनुवृत्त्या उत्तरतनगुर्वनुवर्तनादेस्तत्संकल्पप्रयुक्तत्वेऽपि अत्राङ्गिनस्सकृत्त्वेन ...त्वाभावात् । तदुक्तम् वेदान्ताचार्यैः * संकल्पमात्रमेवाङ्गं श्रुतमाचरणं पुनः । अनङ्गमाज्ञया ...धनम् * इति । अतः वर्णाश्रमधर्माणां प्रपत्त्यङ्गत्वे प्रमाणाभावात् न विरुद्धविधिद्वय- ...ः न निर्हेतुकत्वसिद्धिरिति ॥

यदुक्तं प्रपत्तेः वर्णाश्रमाचाराङ्गत्वे प्रमाणाभाव इति तन्नोपपद्यते, * न्यासः पञ्चाङ्गसंयुतः * । अत्र * आनुकूल्यस्य संकल्पः * इत्यानुकूल्ये संकल्पशब्दश्रवणेऽपि प्रातिकूल्यवर्जने क्वचिदपि न श्रुतः । प्रातिकूल्यवर्जनलक्षणं च * स्वस्य स्वामिनि वृत्तिर्या प्रातिकूल्यस्य ...ङ्गं पञ्चमं प्रोक्तं आज्ञाव्याघातवर्जनम् । अशास्त्रीयोपसेवा तु तद्व्याघात इतीर्यते * इति ... प्रवृत्तिनिवृत्तिलक्षणस्वधर्मानुष्ठानरूपत्वमुक्तम् । न चात्रापि संकल्पशब्दोऽध्या... ...ल्पनाप्रसङ्गात्; अन्यथा विश्वासादिष्वपि संकल्पशब्दाध्याहारप्रसङ्गः ॥

...श्चात्र संकल्पशब्दोऽपि न सार्वत्रिकः, * आनुकूल्यं समाचरेत् * प्रातिकूल्यं परित्यक्तमानुकूल्यं च ... * आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता * इत्यादौ संकल्पशब्दाश्रवणात् । * आनुकूल्येतराभ्यां तु ...रपायतः * इत्येतदपि आनुकूल्यसंकल्पस्य अङ्गत्वेनोपपद्यते, संकल्पमात्रेण कृत्याकरणप्रयुक्तापायनिवृत्त्य- । अतः, क्वचित्सङ्कल्पशब्दो वचनान्तरबाहुल्यानुगुण्येनानुष्ठानपरः, क्वचित्सङ्कल्पशब्दप्रयोगोऽपि ...वमनुष्ठेयस्यानुकूल्यस्य प्रपत्त्यङ्गत्वात् तत्प्रारम्भमात्रं पूर्वाङ्गमिति सूचनार्थः; तथा हि आनुकूल्या... ...न प्रपत्त्यङ्गम्; किन्तु तेषां पूर्तिः, * पूर्णैरङ्गैरुपाङ्गैश्च अङ्गपूर्तिमिमां शृणु * इ...

तन्नियमः ॒र्णानामा॰
नियमस्तु
नन्विदं वचने
तदतिरिक्तस॰
देशाद्यनियमानां
तस्मान्वर्णाश्रमा॰
मन्त्रद्वयपूर्वमेवा॰

सर्वेषां तान्त्रिकं वेति विकल्पश्च न युज्यते । 'न जातिभेद' मित्यादिप्राज्ञसंश्रयगोचरम्
तस्माद्देशादितत्त्यागोपादानाशक्तितः फलम् । वरणं सिद्धमित्याहुः न्यायमार्गे सुशिक्षिताः

इति देशकालनियमाभावाधिकारः ॥ १६ ॥

॥ १७ ॥ अथ प्रकारनियमाभावाधिकारः ॥

प्रकारनियतियिल्लै

* सर्वेषां एदे ... पूर्वाधिकारे देशकालनैरपेक्ष्यविधिसाधनपूर्वकं विद्याभेदः प्रसाधितः । अत्र वर्णाश्रमा
व्यवहार॰ विधिसाधनपूर्वकं विद्याभेदसमर्थनेन फलप्रपत्तिसिद्धिरुच्यत इति सङ्गतिः ॥

न ... अ॰ अत्र संशयः ; फलंप्रपत्तिर्नास्ति, उतास्तीति । तदर्थम् विद्याभेदो नास्ति, उतास्ति
प्रपत्तेः वर्णाश्रमधर्माङ्गकत्वे प्रमाणं नास्ति, उतास्तीति । तदर्थम् * आनुकूल्यस्य संक॰
संकल्पमात्रमङ्गम्, उत वर्णाश्रमधर्मानुष्ठानमङ्गत्वेन निर्दिश्यत इति । तदर्थम् तस्य वर्णाश्रम॰
विनिगमकं नास्ति, उतास्तीति ॥

तत्र सङ्क॰
प्रथमं
फलत्ववु

यदा नास्ति तदा संकल्पमात्रं तत्राङ्गत्वेन विवक्षितमिति, वर्णाश्रमधर्माङ्गकत्वे प्रमाणाभा॰
धर्माङ्गकत्वतदभावाङ्गकत्वलक्षणविरुद्धधर्मसमाजाभावेन विद्याभेदाभावात्फलप्रपत्त्यसिद्धिरि॰
फलफलिभावः ॥

यदा च संकल्पशब्दस्य संकल्पविषयवर्णाश्रमधर्माचारपरत्वे प्रमाणमस्ति ; ॰फलत्ववचन
देकत्र वर्णाश्रमधर्मस्य तत्त्यागस्य चोपसंहारासंभवेन विद्याभेदसिद्धेः फलप्रपत्तिसं॰ ॰प्रपत्ति
उ॰ सिद्धिरिति राद्धान्ते फलफलिभावः ॥

केवलसंक॰ पूर्वपक्षस्तु ; प्रपत्तौ * सर्वधर्मान्परित्यज्य * इति विद्याविशेषत्वात् वर्णाश्र॰
* ॰नुपपत्तिरेतौ तन्नैरपेक्ष्यं तावद्विधीयते तद्विरुद्धम्, अत्र वर्णाश्रमधर्माणामप्यङ्गत्वात्, विर॰
यथाचार्यनिष्ठातन्त्राणा॰भेदात्फलप्रपत्तिसिद्धिरिति यदुच्यते, तन्नोपपद्यते । प्रपत्तेः वर्णाश्रमधर्माङ्गत्वे प्रमाणा॰
फलाव्यभिचार ॥ ॰नोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु । वर्णाश्रमाचारवता पुरुषेण परः पुमान् ॥ विष्णुर॰
॰पकारकः * इति सामान्यविशेषरूपवचनैः प्रपत्तेरपि तदङ्गत्वमवगम्यत इति वाच्यम्,
न च * उपाय॰ * इति विशेषविधिबलेन उत्सर्गापवादनयात् सामान्यवचनानां विहितव्यतिरिक्तविषयत्वा॰
शरणागतेः

प्रवृत्त्यर्थत्वत्या॰ न च, * यज्ञेन * इति वचनात् * सहकारित्वेन च * इति सूत्राच्च तत्प्राप्तिः, तस्या॰
॰जनम् * इत्या॰ साधारण्येन न्यासविद्याव्यतिरिक्तविद्यान्तरविषयत्वात् ; न च * आनुकूल्यस्य संकल्पः प्रातिकूल्य॰
॰योगस्य तद॰ त्यादौ विहितकरणनिषिद्धाकरणयोः प्रपत्त्यङ्गत्वेनोक्तत्वात्, वर्णाश्रमधर्माङ्गत्वप्रसङ्गः ; तत्र संकल॰
॰त्वेन तदधिककल्पनायां श्रुतहान्यश्रुतकल्पनयोः प्रसङ्गात् । न चानुष्ठानस्यैवाङ्गत्वं सर्व॰
॰पमात्रस्यैवेति वाच्यम्, * आचार्याधीनो भव, बाढम् * इत्यत्र तदङ्गत्वदृष्टेः ॥

Location 2/B R 2

Location R